॥ राजा महेन्द्रप्रतापः ॥



श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम् - गुजरातम्

।। राजा महेन्द्रप्रतापः ।।

प्रेरणास्रोतांसि एवं मार्गदर्शकाः

श्रीकुलपतिवर्याः

प्रॉ. पङ्कज एल. जानीजीमहाभागाः

लेखकः

डॉ. सञ्जीव ओझा

अनुवादकौ

डॉ. नरेन्द्रकुमार पण्ड्या

प्रा. कालिदास कृ. ठाकर

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. विष्णुः पुरोहितः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

परामर्शनसमितिः -

डॉ. नरेन्द्रकुमार पण्ड्या

डॉ. देवेन्द्रनाथः पाण्डेयः

प्रा. ललितः पटेलः

डॉ. भावप्रकाशः गांधी

कार्यसंयोजकः -

श्री दशरथः जादवः

(उपकुलसचिवः)

प्रथमं संस्करणम् - फरवरी, २०१३

ISBN -13 978-81-925721-6-1

प्रतयः - ३००

मूल्यम् - ५०/-

मुद्रकः -

एच. के ओफसेट, वेरावलम्

।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनम् बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने-जने करोति। अत एवोक्तम् "पुस्तकी भवति पण्डितः"। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे '**स्वर्णिमगुजरातजयन्ती**'- अवसरे तथा बेङ्गलूरुनगरे आयोजितायां '**विश्वसंस्कृतपुस्तकमेलायां**' श्रीसोमनाथसंस्कृतविश्वविद्यालयः गुजरातराज्यगांधीनगरद्वारा प्रकाशितायाः '**सरफरोशश्रेण्याः**' कतिपयगुजरातीभाषायां प्रणीतग्रन्थानां संस्कृतभाषायाम् एकस्मिन् अभियानेऽनुवादं कारयित्वा तेषां प्रकाशनमपि विश्वविद्यालयः करोति। तदन्वयेनान्येषां नवोदितलेखकानां प्राप्तप्रतिष्ठानां लेखकानाञ्चा-प्रकाशितपुस्तकानां प्रकाशनमपि कर्तुं प्रवृत्तोऽस्ति। अस्मिन्नेव सन्दर्भे **डॉ. सञ्जीव ओझा** रचितोऽयं **डॉ. नरेन्द्रकुमार पण्ड्या** तथा **प्रा. कालिदास कृ. ठाकराभ्याम्** अनूदितोऽयं **राजा महेन्द्रप्रतापः** नामधेयः ग्रन्थः सादरं प्रकाश्यते। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

प्रो. पंकज एल. जानी

कुलपतिः

अनुक्रमणिका

●●●

प्रकरणम् - १

क्रान्तिपूजक:

सृष्टौ मनुष्य: अद्भुत: प्राणी इति मन्यते। बुद्धिशक्ते: कारणात् मानवजाति: अनेकविधानि संशोधनानि अकरोत्, अनेकविश्वव्यवस्थानां निर्माणम् अकरोत् अनेककल्पना: साकारयितुं सततं प्रयत्नशीला स्थिताऽस्ति।

बुद्धिरस्ति चेत् सदसद्विवेक: स्वाभाविकेन क्रमेण विकसति। बुद्धे: अधारेण मनुष्य: स्वाभाविकेन क्रमेण विकसति। बुद्धे: आधारेण मनुष्य: स्वस्य हितम् अहितं च स्पष्टतया ज्ञातुं शक्तिं विकसितां कर्तुं सफल: अभवत्। एतस्मात् साफल्यात् जन्म अलभत मनुष्यजाते: इतिहास:।

मनुष्य: एकल: असम्पृक्त: अवस्थातुं सज्ज: न भवति तस्मात् मानव: समुदायस्य स्वरूपे निवासं प्रारभत। समुदायस्य प्रत्येक: जन: स्वस्य हितम् अहितं च चिन्तयति तथैव सम्पूर्ण: समुदाय: अपि स्वस्य लाभालाभयो: स्वार्थस्य चिन्ताया: उद्भवक्रम: इतिहासपृष्ठेषु वाचयितुं प्राप्यते।

चिन्तां स्वस्य पक्षे परिवर्तयितुं मानवसमुदाय: व्यापारम् उपासनापद्धतिं शस्त्रसहितानि अनेकानि उपयुक्तवान् इतिहासे। मनुष्यो नाम शरीरमनोबुद्ध्यात्मनां समन्वय:। व्यक्तिश: समूहशश्च सफलताया: लाभेन मनोभावा: परिवर्तन्ते। सन्तोष सदृशेभ्य: सद्गुणेभ्य: तिलाञ्जलिं दत्त्वा मनुष्यजाति: अधिकाधिकं प्राप्तुं भोक्तुं वा वृत्या ग्रस्ता अभवत्। एतस्या: वृत्ते: दुष्परिणाम: साम्राज्यवाद:।

मानवसमुदाये कतिपयजातय: साम्राज्यवादं स्वजातीनाम् अस्तित्वहननं विधाय अधिकाधिकं भूभागे स्ववर्चस्वं प्रस्थापयितुं योजना: अकुर्वन्।

आङ्ग्लजना: अस्या: मानसिकताया: अग्रदूता: अभूवन् इति इतिहास: उल्लिखति। सुजलाया: सुफलाया: भारतमातु: सर्वस्पर्शिन्या: सर्वतोमुख्या: प्रगते: सफलपरम्परायाश्च उपरि आङ्ग्लजनानां दृष्टि: अपतत्। व्यापारव्याजेन आङ्ग्ला: भारतभूमिम् आगच्छन्।

घटिकायाः षष्ठभागे व्यापारिणः आङ्ग्लाः शासका अभूवन् ।

मोगलानाम् आक्रमणसमक्षं शताब्दीभ्यः सङ्घर्षरतस्य भारतस्य स्वस्य सङ्घर्षस्य नवीनम् अध्यायं प्रारब्धुम् अनिवार्यता आपतिता । एषः अध्यायः न केवलं भारतस्य कृते न वा केवलम् आङ्ग्लानां कृते, किन्तु समग्रविश्वस्य मानवसमुदायस्य कृते बोधप्रदः अध्यायः अभवत् ।

भारतस्य आआङ्ग्लैः सह सङ्घर्षस्य अध्यायः दीर्घः अस्ति । सङ्घर्षस्य प्रारम्भेन सह एव कालचक्रं परिभ्रान्तम् अभवत् । १९४२ ईसवीयवर्षपर्यन्तम् आङ्गलशासनविरुद्धं सङ्घर्षं कुर्वाणं जनम् आङ्ग्लशासनं विद्रोहित्वेन व्यज्ञापयत् विद्रोहिजनानाम् अस्तित्वं सङ्कल्पं च निहन्तुं प्रबलाः प्रयासा अभवन् । एतादृशान् भारतमातुः भक्तान् लोकदृष्टितो दूरीकर्तुम् अपि च लोकस्मृतितोऽपि दूरीकर्तुं सुनिश्चिताः प्रयासाः अभवन् ।

अस्य दमनचक्रस्य भोगीभूतेषु कतिपयान् १९४२ ईसवीयवर्षस्य अगस्तक्रान्तिसंज्ञकान्दोलनात् अनन्तरम् आङ्ग्लशासनं भारतशासनस्य सहभागिनः अकरोत् ।

किञ्चित् प्राप्तुं सततप्रवृत्तिः मनुष्यस्य स्वभावोऽस्ति । अस्मिन् स्वभावे अल्पेन परिश्रमेण अधिकं प्राप्तुं वृत्तिः जाग्रती दृश्यते ।कदाचिदेवंविधमपि दृश्यं दृग्गोचरीभवति यथा यत् प्राप्तुम् इच्छा भवति तस्य विकल्पे किमपि आकर्षकं प्राप्य मूलमुद्देश्यं तिरोहितं जायते ।

मनुष्यस्वभावस्य एषा मर्यादा अस्ति तथाऽपि अनेके अपवादाः अस्माभिः प्राप्यन्ते । एतादृशः एकः अपवादः अर्थात् प्रचण्डक्रान्तेः उपासकः, घोरविद्रोहस्य एकनिष्ठः पूजकः भीषणविप्लवस्य च एकान्तसाधकः राजामहेन्द्रप्रतापः !

सततम् एकत्रिंशत्वर्षपर्यन्तं भारतस्य स्वतन्त्रतायै भारताद् बहिः विप्लवध्वजं गृहीत्वा कारयितो भवन् राजमहोदयः (राजासाहेबः) इति प्रख्यातः महेन्द्रप्रतापः यः अल्पवर्षेभ्यः पूर्वं भारतं प्रति निवृत्तोऽभविष्यत् चेत् आङ्ग्लशासनस्य हस्ते गृहीतोऽभविष्यत्, न्यायबहिष्कृतं ज्ञापयित्वा आङ्ग्लगोलिकाया लक्ष्यम् अभविष्यत्, विद्रोही इति ज्ञापयित्वा उद्बन्धनमञ्चे उद्बद्धोऽभविष्यत्, राजद्रोही इति साधयित्वा कालसलिले आजीवनं कारागृहदण्डताडनेन

ताडितोऽभविष्यत् ।

मनुष्यस्वभावस्य वैशिष्ट्यमेतदेव अस्ति यत् स पुरुषार्थं कुरुते सत्परिपालनस्याशया, परन्तु भारतमातुः पुत्राणां काचित् विलक्षणा विशेषता विश्वेन अनुभूता अस्ति । श्रीमद्भगवद्गीतायां श्रीकृष्णस्य बोधवाक्यं कर्मण्येवाधिकारस्ते मा फलेषु कदाचन इति जीवने आचरन्ती भारतीया प्रजा अस्ति ।

एकं जीवनम्, एकं ध्येयम् इति इमं मन्त्रं साकारयितुं किमपि कर्तुं ध्येयनिष्ठा साधारणातिसाधरणे भारतीये मनुष्ये अनुभवितुं शक्यते ।

एकत्रिंशद्वर्षावधि प्रबलप्रयत्ने निरन्तरं लग्नता साऽपि सर्वथा विपरीतायां परिस्थित्यां स्वात्मानं सुरक्षितं विधातुं घटना निश्चितरूपेण असाधारणी एव गण्येत ।

आङ्गलशासनं भारतात् बहिर्निःसारयितुं कतिभिः नामिभिः अनामिभिः मानवैः उद्बन्धनपाशो हसन्मुखेन स्वीकृतः । स्वमातृभूमिं कलङ्कयतः आङ्गलान् प्रति विद्रोहं विधाय यष्टिगोलीर्भुक्त्वा हुतात्मताम् अङ्गीकुर्वतां मनुष्याणां सूचिः कियती दीर्घा अस्ति । निर्भरयौवने जीवनस्य शेषवर्षाणि कारावासे यापनीयानि तत् विदित्वाऽपि स्वस्य कुटुम्बस्य च चिन्तां हित्वा भारतमातुः कृते जीवनं समर्पयतां नरपुङ्गवानां संख्या शतशः अस्ति ।

श्यामजिकृष्णवर्मा, लालाहरदयालः, मौलानाबरकतउल्ला, रासबिहारीबोझः, एवं विधा अनेके क्रान्तिसाधकाः हिन्दुस्थानं स्वाधीनं स्वतन्त्रं द्रष्टुमेषणां गृहीत्वा विदेशे निजान् अन्तिमश्वासान् अगृह्णन् ।

राजा महेन्द्रप्रतापः नूनम् एतादृशे एव समये स्वदेशं प्रतिन्यवर्तत यदा भारतं स्वतन्त्रतायाः द्वारे प्रत्युपस्थितम् आसीत् ।

परन्तु भारतागमनात् प्राक् दशकत्रयम् ? छायेन गुप्तचररूपेण यमराजदूता राजमहोदयम् अन्वगच्छन् ।

सर्वशक्तिसम्पन्नम् आङ्गलशासनं स्वस्य कपटजाले पाशयितुं धीवर इव असकृत् स्वमायाजालं राजमहोदयं परितः प्रासारयत् । असकृत् मृत्योः घोरघटां शिरसि नृत्यन्तीं दृष्ट्वा राजमहोदयः स्वजीवनात् निराशो भवितुं परवशोऽभवत् ।

विपरीतपरिस्थित्यां मनुष्यः पतति तदा तस्य मतिः कुण्ठिता जायते । कुण्ठिता मतिः प्रयत्नं विधातुं गतिमती न भवति । दृढं मनः स्यात् तदा एतादृशी कुण्ठिता बुद्धिः प्रश्नम् उत्पादयति यत् प्रयत्नं कृत्वाऽपि प्रातिकूल्यात् कीदृशः परिणामः आपत्स्यते ?

स्वदेशं प्रतिनिवर्तयितुं सर्वाभ्य एव आशाभ्यः सम्भवज्ञो राजमहोदयोऽपि तिलाञ्जलिं दत्तवान् । हिन्दुस्थानं प्राप्तस्वातन्त्र्यं द्रष्टुमभिलाषोऽपि कदाचित् व्यपगच्छत् । परन्तु भाग्ये यल्लिखितं तत् को वा मिथ्या कर्तुं शक्नुयात् ।

साधनापथे चलन् पथिको द्विविधो दृश्यते । स्वस्य आत्मनोमोक्षार्थकः साधकवर्गस्तथा व्यापकध्येयप्रत्यर्थः साधनापथप्रवृत्तो वर्गः । द्वयोर्वर्गयोः साधनायाः साधनानि कदाचित् भिन्नानि तथाऽपि शैली समाना एव भवति । मनसा वचसा कर्मणा अहर्निशं साधनायां यः साधकः निमग्नो भवति, स तस्यां साधनायामवश्यं सफलो भवति । राजा महेन्द्रप्रतापः स्वस्याः भारतमातुः स्वातन्त्र्यप्रदानस्य साधनायां ध्रुवं सफलः अभवत् ।

राजमहोदयस्य द्वात्रिंशद्वर्षात्मकविश्वभ्रमणस्य घटनामयजीवनस्य विवरणस्य कौतुकपूर्णं विवेचनं रोचकं, उत्साहप्रेरकं बोधप्रदं च भवति अथ च भारतनीयायाः ऐतिहासिकक्रान्त्याः उल्लेखितैतिहासस्य अप्रकाशितपृष्ठेषु प्रचुरं प्रकाशं प्रक्षिपति ।

वर्तमानजीविनां मोदप्रमोदमग्नमनसां लोकानां मनसि इतिहासस्य महत्त्वं शून्यम् अस्ति । एष समुदायः इतिहासं शुष्कं मनुते, इतिहासस्य कारणात् समयचक्रं पश्चात् नेतुं प्रवृत्तिं पुरातनवादिनीं गणयति, इतिहासस्य आरोहावरोहम् अहिफेन-द्रव्यसमानं मन्यते ।

परन्तु इतिहासेन वर्जितो मानवसमुदायः अकल्प्यः अस्ति । लघुगुरुघटनानां वर्णनं मानवमानसं घटयितुं सार्थिकीभूतम् अस्ति । स्वपूर्वजेषु सम्बन्धं द्रढयितुम् इतिहासः अनितरसाधारणीं भूमिकां भक्तवान् अस्ति ।

इतिहासे निरन्तरं दृष्टिं रक्षित्वा चलन्तो जना एव भाविनः इतिहासस्य सर्जने अमूल्यं योगदानं दातुम् अशक्नुवन् प्रतियुगं मानवसमुदायाय आदर्शपुरुषं दर्शयितुं महत्त्वपूर्णभूमिकायाः कार्यम् इतिहास एव कर्तुं सम्भवति ।

महानारीणां महापुरुषाणां प्रेरकजीवनस्य महत्यां गाथायां प्रगाढं पादचिह्नम् अङ्कितं भवति । देशवासिषु तत् स्फूर्तिं चेतनां प्रेरणां साहसं सञ्चार्य तदीयहृदयेषु

महतीमाकाङ्क्षां प्रबोधयति राजमहोदयस्य त्यागमयं निःस्वार्थं जीवनमपि एतादृश्या एव कक्षायाः आसीत् ।

१९२० ईसवीयवर्षतः प्राक् 'भिक्षां देहि' इति राजनीतिः प्रबला आसीत् । स्वराज्यान्दोलनस्य प्रचण्डरूपेण प्रारम्भे सत्यपि राजनीतौ स्वावलम्बनस्य तत्त्वं भावना च पूर्णतया न समाविशत् ।

कस्यापि देशस्य भाविनो दिशाम् आकारस्य च प्रदाता वर्गः अर्थात् युवकवर्गः । किमपि कर्तुम् उत्कटेच्छा साहसिकवृत्तिः प्रतिकाराह्वानं स्वीकर्तुं मानसिकता इत्येतादृशा युववर्गस्य गुणविशेषा मन्यन्ते । दासत्वात् आकुलीभूय स्वातन्त्र्याय आतुराणां भारतीयानां युवकानां पुरतः एक एव मार्गः अवशिष्ट आसीत् । तन्मार्गमाश्रयन्तो यदा अपश्यन् यत् देशं निःशस्त्रं विधाय सर्वथा नपुंसकसमानो विधीयते देशः । तदा निरुपायीभूय तैः विदेशात् सहायतामासाद्य स्वदेशस्य स्वातन्त्र्याय प्रयत्नः प्रारब्धव्योऽभवत् । राजमहोदयः इममेव मार्गमाश्रितवान् ।

भारतीय स्वतन्त्रतासङ्ग्रामस्य मुद्रितेषु पृष्ठेषु वाचितेषु अहिंसकजनान्दोलनात् एव आङ्गलाः भारतं त्यक्तुं विवशा अभूवन् इति चित्रम् उपोद्गच्छति । भारतस्य स्वतन्त्रतायाः यशोभाक् कश्चित् एकः नेता, कश्चित् एको नेतृगणः अथवा एका संस्था इति मान्यता ऐतिहासिकी क्षतिः गणयिष्यते ।

महान् क्रान्तिकारी नेता देशभक्तः सुभाषचन्द्रः बोझः द्वितीयविश्वयुद्धस्य दिवसेषु प्रथमं बर्लिने ततश्च मलायाः बर्मादेशयोः गत्वा यत् किमपि कृतवान्, तत्सर्वम् एव राजमहोदयः ई.स. १९१४-१९१८ वर्षेषु प्रथमविश्वयुद्धस्य दिवसेषु अकरोत् तदेतत् कियन्तो भारतीया विदन्ति ?

किमपि ज्वलत्पदाक्रमणम् उभयतोधारः खड्गः इव भवति क्रान्तेः मार्गः अपि एवं विधोऽस्ति । क्रान्तेः मार्गः विविधेषु देशेषु असकृत् समाश्रितोऽस्ति । क्वचित् एषः मार्गः अभिशापरूपः अपि सिद्धो अभवत् । यद्विदेशीयाशक्तिः एव स्वामिनी भूत्वा देशस्य आधिपत्यं कृतवती इत्यस्य उदाहरणानि अपि इतिहासेषु दृश्यन्ते ।

अद्यापि क्रान्तिमार्गस्य विवेचनं केवलं सफलतायाः निष्फलतायाः मानदण्डेन

नोचितमस्ति। क्रान्तिमार्गम् आश्रितवतः सत्यता, सौजन्यम्, निःस्वार्थसाधना एवं तदर्थम् अनुष्ठिता निरन्तरप्रयत्नाः अपि अवश्यं समदरणीया एव।

जयचन्दः महम्मदघोरिं राणासाङ्गा च बाबरं निमन्त्रितवान् इति उदाहरणम् अस्य देशस्य इतिहासे मिलति। अस्य अयं परिणामः अभवत् यत् निमन्त्रिताः ते लोकाः एव अत्र निजं साम्राज्यं ध्रुवम् अकुर्वन्।

१७६२ ईसवीयवर्षे फ्रांसदेशे प्रचण्डविद्रोहावससरे अमेरिकासहायतया इटालीदेशस्य सुप्रसिद्धो देशभक्तो गेरीबेल्डी बाह्यसहायताधारेण १८२८ ईसवीयवर्षे प्रजातन्त्रम् अस्थापयत्। फिलिपाईन्सदेशभक्ता ईटालीदेशानुकरणम् अकुर्वन् किन्तु ते सफला न अभूवन्, स्पेन सहायतां गृहीतवति फिलिपाईन्सदेशे स्पेनदेशः आधिपत्यम् अस्थापयत्। स्पेनं निष्कास्य अमेरिकासाम्राज्यम् अस्थापयत्।

रशियनक्रान्तिनिर्मातुः लेनिनः झारशाहिनः करतलात् मुक्तिं प्राप्तुं प्रथमविश्वयुद्धसयमे जर्मनदेशस्य साहाय्यं ग्रहीतुं तत्परः अभवत् परन्तु दूरदर्शितया जर्मनदेशं निमन्त्र्य अपि जर्मनजनान् रशियनधरायां पादं स्थापयितुं न अन्वमन्यत।

प्रथम द्वितीयविश्वयुद्धसमये यदि इंग्लेन्डदेशेन अमेरिकासाहाय्यं न लब्धं स्यात्तदा अद्य विश्वस्य इतिहासः एवं मानचित्रं भिन्नम् एव अभविष्यत्।

राजनीतिः भवेत् अथवा वैश्विकी कूटनीतिः भवेत् शत्रोः शत्रुः मित्रम् इत्येष सिद्धान्तः व्यूहरचनया उपयुक्तः पुनः पुनः दृश्यते।

राजमहोदयः ईदृशस्य इतिहासस्य गंभीरम् अध्ययनं कृत्वा स्वस्य दासीभूतदेशं स्वतन्त्रं कारयितुं कस्यापि विदेशस्य शासनस्य सहायतां ग्रहीतुं व्यचारयत्। हिन्दुस्थानं स्वतन्त्रयितुं स इंग्लेन्डदेशस्य शत्रुभूताः विदेशीयसत्ताः स्वस्य साहाय्यार्थम् असज्जयत्।

स्वस्य वैयक्तिकजीवनस्य आशाः आकाङ्क्षाश्च त्यक्त्वा समाजाय देशाय सर्वस्वं समर्पयितुम् उज्ज्वला प्रथा भारते नवीना नास्ति। विश्वमञ्चे अनेके देशाः सन्ति, प्रत्येकस्य काचित् विशेषता अस्ति। भारतस्य विशेषता त्यागस्य मान्यतायाम् अस्ति। एषा विशेषता वंशानुवंशं रक्तसंस्काररूपेण आनुवंशिकतायां प्राप्यते। एतादृशानां त्यागभयानां ज्वलतामुदाहरणानां विस्तृता सूचिः इतिहासस्य एकैक पृष्ठे वाचयितुं प्राप्यते।

द्वात्रिंशदवर्षात्मके वयसि राजकीयसुखोपभोगं सुखशान्तिमयं जीवनं गौतमबुद्ध इव परित्यज्य राजमहोदयः क्रान्तिकारस्य तथाविधं जीवनम् अङ्गीकृतवान् यत्र अनावृत्तपदेन कण्टकीलमार्गे चलितव्यम्, यत्र न तु सुखेन निद्रा लभ्यते एवं न तु सन्तोषेण उदरपूरं भोक्तुम् अपि भाग्ये भवेत् ।

ईदृशे कठिने जीवनपथे चलितुं निर्णयं राजमहोदयः कृतवान् । अस्मिन् मार्गे चलितुं केवलं पुरुषार्थः एव न पर्याप्तः आसीत् परन्तु आङ्गलशासनस्य बौद्धिककौशल्यं पराजेतुं पूर्णं च आयोजनम् आवश्यकम् आसीत् । प्रत्येकम् अवसरे योग्य सहकारिभिः सह परामर्शं कृत्वा सामूहिकनिर्णयः एवं तदीय मूल्याङ्कनम् आवश्यकम् आसीत् करतले शिरो निधाय राजमहोदयः युरोपैशियादेशानां साहसपूर्णं भ्रमणम् अकरोत् । तत्रत्यान् सर्वान् शासकान् नृपांश्च अमीलत्, काबुलदेशे - अस्थायिरूपेण स्वतन्त्रहिन्दुस्थानशासनस्य स्थापनाम् अकरोत् ।

१८५७ ईसवीयवर्षात् पश्चात् स्वतन्त्र हिन्दुस्थानशासनस्य स्थापनार्थम् एष एव प्रथमः अवसरः आसीत् ।

न केवलं हिन्दुस्थाने एव परन्तु समग्रे विश्वे एषः प्रयत्नः सविस्मयम् अदृश्यत । राजमहोदयस्य एष प्रयत्नः निष्फलः अभवत् किन्तु स प्रयत्नः स्फूर्तिं चेतनां प्रेरणां च अवश्यम् उदपादयत्, या हिन्दुस्थाने हिन्दुस्थानाद् बहिश्च विदेशेषु वसतां हिन्दुस्थानीयानां हृदयेषु अङ्किता बभूव ।

राजमहोदयस्य अनेन प्रयत्नेन यस्य इतिहासस्य श्रीगणेशः अभवत् तं नेतृवरसुभाषचन्द्रबोसः चरमसीमानम् आरोहयत् ।

●●●

प्रकरणम् - २

बीजाङ्कुरः

महाभारतस्य रणभूमौ कातराय अर्जुनाय वीरताया उपदेशं दत्त्वा शूरवीरं कुर्वाणं श्रीकृष्णं जनयित्वा स्वस्य क्रोडे वर्धयित्वा अमरकीर्तिं प्राप्तवत्यां पवित्रायां व्रजभूमौ स्वस्य शौर्येण वीरतया इतिहासस्य पृष्ठेषु अमरां मुद्राम् अङ्कयितरि वीरजाटजातिवंशे महेन्द्रप्रतापः जन्म गृहीत्वा व्रजभूमेः जाटजातेश्च समुज्ज्वलेतिहासे कतिमयातिशोभमानानि पृष्ठानि समैधयत् आधुनिकेतिहासपुस्तकानि पठामस्तर्हि भारतस्य लोकतन्त्रम् आङ्ग्लशासनस्य उपहारः अस्ति इतीदृशं चित्रमुत्प्रसरति !! लघुलधूनि राज्यानि प्रजाहितमविचिन्त्य धनसम्पदायामासक्तानि आसन् तादृशम् एव वर्णनं वाचयितुं प्राप्यते । प्रबन्धनपद्धतिः शासकीयपद्धतिश्च भारते कदाऽपि नैव विकसिता । प्रजा अबुधा एवं विधिनियमान् उल्लङ्घ्य हिंसाम् अत्याचारं च कुर्वती आसीत् तादृशी भारतस्य छविः उत्थिता आसीत् ।

इतिहासे लघुगुरवः अपवादाः भवितुं शक्यन्ते । परन्तु इमान् अपवादान् प्रधानान् कृत्वा तेषां वर्णनेनभ्रामकतथ्यानाम् आधारस्वरूपेण उपस्थानम् इतिहासनाम्ना बहुविशालः कलङ्कः गणयिष्यते ।

महेन्द्रप्रतापस्य जन्म यत्र अभवत् तस्य राजकुटुम्बस्य एकदा व्रजभूमौ सुदूरं प्रसृतो व्यापः आसीत् । मथुरा एतस्य राजधानी आसीत् । वीरजाटजातिराज्यं विशालं शक्तिसम्पन्नरूपसमग्रव्रजभूमौ ततोऽधिकं च भूविस्तारे यथा धौलपुरे भरतपुरे मुरसाने हाथरसे अलीगढे प्रसृतम् आसीत् । पञ्चनदे शीखसाम्राज्यस्थापकः पञ्चनदे शीखसाम्राज्यस्थापकः पञ्चनदकेसरीमहाराजो रणजितसिंहः अपि अस्यां वीरजाटजात्यां जन्म अलभत ।

मुलतानपर्यन्तं गत्वा अस्या वीरजातेः योद्धारः महम्मदगजनवेरुपरि आक्रमणम् अकुर्वन् । १८०४-०५ ईसवीयवर्षे भरतपुरनरेश रणजितसिंहनृपस्य नेतृत्वे लोर्डलेकनः परास्तः । ईदृश्याः वीरतायाः कृते एकाः लोकोक्तिः प्रसिद्धा यत् -

अष्टौ फिरङ्गिणः नव गौरा युद्ध्येते जाटस्य द्वौ बालकौ जाटजातीतिहासलेखनस्य नायं हेतुः, परन्तु स्वातन्त्रसङ्ग्रामे आङ्ग्लशासनेन समग्रभारतस्य लघुगुरुभिरनेकजातिभिः

सह सङ्घर्षः कर्तव्योऽभवत् तदुल्लेखः आवश्यकः गण्यते । आङ्ग्लशासनं स्वस्य कार्यकाले कदापि शान्त्या निद्रां नाऽलभत । विशालभारतस्य विभिन्नजातयः स्वक्षात्रवृत्तेः अनुभवम् आङ्ग्लान् कारयितुम् एषा वास्तविकता साधिता यत् जातिव्यवस्था कर्माधारिता न तु जात्याधारिता ।

अत एव अस्माकं चरित्रनायकस्य राज्ञो महेन्द्रप्रतापस्य वंशस्य तद्वंशस्य वीराणां वंशजानां परिचयं प्राप्तुम् अस्थाने न गण्येत् ।

येन कपटेन भेदभावेन कूटनीत्या यः आङ्ग्लशासनं जाटराज्यस्य छिन्नभिन्नतां कृत्वा नष्टभ्रष्टताम् अकरोत् तस्य कारणं किम् आसीत् ? महेन्द्रप्रतापस्य पितामहः आङ्ग्लविरुद्धं भीषणं युद्धम् अकरोत् । तत्र पराजितत्वकारणात् राज्यस्य बृहत्तरो भागो व्यपगतः ।

१८५७ ईस्वीयवर्षस्य भीषणक्रान्तिसमये महेन्द्रप्रतापस्य पिता श्रीघनश्यामसिंहः तथा तस्य कतिपये सखायः छलछद्यमाचारस्य भागरूपे आङ्ग्लेभ्यः सहकारम् अयच्छन् तस्याः सहायतायै पुरस्काररूपेण पित्रे मुरसानसंस्थानं प्रदत्तमभवत् तस्य परिवारः पुनर्मथुरामेत्य अवसत् । श्रीघनश्यामसिंहः राजासनमारोह्य राज्याभिषेकं कृत्वा विभूषितः कृतः । राज्याभिषेकानन्तरं मथुरा बुलुन्दनगरं जनपदस्य कतिपयग्रामाः राजपदवी राजभक्तिप्रमाणपत्रम् इत्येतत् सर्वं प्राप्तुं सफलता प्राप्ता ।

आषाढ शुक्ल ५ अर्थात् ९ दिसम्बर १८८६ दिने मुरसाने कुमारमहेन्द्रप्रतापस्य जन्म अभवत् । तस्य द्वौ बान्धवौ आस्ताम् एकः कुमारः दत्तप्रसादसिंहः अपरश्च कुमारो बलदेवसिंहः ।

रामायणस्य महाभारतस्य ऐतिहासिकतथ्यान् अनङ्गीकृत्य एतयोः श्रद्धेयग्रन्थयोः टीकाम् अकरोत् । स्वात्मानं प्रगतिशीलम् इतिहासकारं गणयन् अयं वर्गः एकं वाक्यम् ज्ञात्वा स्वीकुर्यात् एव - हिस्टीरी रीपीट्स ईटसेल्फ - इतिहासः पुनः पुनः रच्यते ।

कंसस्य क्रूरात् करतलात् रक्षितुं श्रीकृष्णः जन्मनः पश्चात् मथुरां परित्यज्य वृन्दावनं प्रापितः कंसात् रक्षितः किन्तु समग्रभारतस्य धर्मशक्तिः सत्यस्य मार्गे विजयं दातुं श्रीकृष्णस्य मथुरातः वृन्दावनं प्रति स्थलान्तरणं निमित्तम् अभवत् ।

पुनः इतिहासः उल्लिखति एकं मुहुः स्थलान्तरणम् तदखिलपि मथुरातः वृन्दावनं प्रति !! हाथरसस्य नृपः हरनारयणसिंहः कुमार महेन्द्र प्रतापं सार्धद्वयवर्षवयसि दत्तकं गृहीतवान् । हाथरसस्य राजा वृन्दावने अवसत् । अत एव महेन्द्रप्रतापस्य जीवने अपि श्रीकृष्णवत् मथुरां त्यक्त्वा वृन्दावने स्थलान्तरणं कर्तव्यम् आपतितम् ।

कतिपयजनाः घटनानां कारणात् महत्ताम् प्राप्नुवन्ति । कतिपयजनाः महान्तो विधीयन्ते परं कतिपयजनाः महत्तया सहैव जन्मलभन्ते । बाल्यावस्थायाम् ईदृशां महत्तां विभूतिस्वरूपाणां जनानां जीवने महत्त्वस्य परिवर्तनं निर्मीयते । जीवनं प्रति दृष्टौ दिशायां च तेन परिवर्तनम् आगच्छति ।

हाथरसस्य व्यापः अलीगढे मथुरायाम् अथ च बुलन्दनगरे अपि प्रसृतः आसीत् । एतादृशस्य विशालराज्यस्य राजा हरनारायण-सिंह-कुमारः महेन्द्रप्रतापः केवलम् अष्टवर्षीयः आसीत् तदानीं मरणं प्राप्तः । अष्टवर्षात्मिके कोमले वयसि कुमारो महेन्द्रप्रतापो राजा घोषितः परन्तु अवयस्कतया राज्यम् कोर्ट ओफ वोडर्स इत्यस्य हस्ते समर्पितम् ।

महेन्द्रप्रतापसिंहस्य प्राथमिकं शिक्षणं पूर्णम् अभवत् ततः तेन महोमेडियनएग्लोओरियन्टल महाविद्यालये अलीगढे प्रवेशः लब्धः । एषः महाविद्यालयः अनन्तरम् अलीगढमुस्लिमविश्वविद्यालयः अभवत् । अत्र मेट्रीक उत्तीर्णः । महाविद्यालये कुमार महोदयस्य गणना प्रतिभासम्पन्नविद्यार्थीरूपेण क्रियते स्म ।

●●●

प्रकरणम् - ३

क्रान्तिपथे युवराजः

मनुष्यः आनुवंशिकतां प्राप्नोति । आनुवंशिकताप्राप्तिवार्तायां सत्याम् एव धनसम्पदायाः, अलङ्काराणां, भूमेः, भवनादीनां च गणना स्वत एव भवति । भारतीयचिन्तने भौतिकसुखसमृद्धीनाम् आनुवंशिकता ततश्च आध्यात्मिकानुवंशकिताया गणना महनीयं स्थानं प्राप्नोति ।

मनुष्यस्य घटनं केवलम् औपचारिकशिक्षणप्रशिक्षणप्राप्त्या न भवति । मातापितृसहितं कौटुम्बिकं वातावरणम् रीतिभातिः तथा च आचारविचाराः अपि शिक्षणप्राप्तौ निमित्तम् अस्ति । एषा एव यथार्थशिक्षा अस्ति यथार्थदीक्षा अस्ति ।

एतत् सत्यं शिक्षणं मनुष्यस्य विचाराणां घटनं कुरुते । विचाराणां घटने जनस्य व्यक्तित्वस्य निर्माणं भवति । इदं निर्माणम् एव चारित्र्यम् इति गण्यते ।

पितामहस्य स्वतन्त्रताभावनानां बीजाङ्कुरः छात्रावस्थायाम् एव महेन्द्रप्रतापस्य हृदयम् आरूढः । बाल्ये प्राप्ताः संस्कारा आजीवनं तिष्ठन्ति । महेन्द्रप्रतापस्य मानसे महाविद्यालयकाले विद्रोहस्य पल्लवा प्रस्फुटितुं प्रारभन्त ।

यौवनस्य विशिष्टलाक्षणिकताः भवन्ति । अन्यायविरोधे सङ्घर्षं विधातुं युवा तत्परो भवति; सङ्घर्षं कर्तुं किमपि कारणम् अन्विष्यन् भवति । युववर्गे तस्य मानसिकताया अनुभवः क्रियते ।

आङ्ग्लशासनसमये पराधीनताशृङ्खलाया भारतमातरं मोचयितुं सङ्घर्षस्य रोमाञ्चक इतिहासः अस्ति । अस्य रोमाञ्चकस्य इतिहासस्य मूले युवशक्तिसामर्थ्यस्य दर्शनाभावो न भवति । सङ्घर्षज्वाला सततं प्रज्वलन्ती रक्षणीया इति क्षमता युवहृदयेषु विद्यमाना भवति तत्कारणात् एव बलपरिपीडनकारकम् आङ्ग्लशासनं प्रति भारतीय समुदायस्य प्रतियोधनं प्रदातुं मानसिकतायां कदापि प्रवृत्तिः न आगता ।

युवराज महेन्द्रप्रतापस्य बीएकक्षाभ्यासकाले छात्राः कार्यस्थगनम् अकुर्वन् । कार्यस्थगनकारणात् १९०७ ईसवीयवर्षे नगरे प्रदर्शनसमये कस्यचित् छात्रस्य

रक्षिपुरुषदौवारिकेण सह वाग्विवादे जाते प्रबलताडनप्रतिताडनस्य घटना अभवन् ।

छात्रेण रक्षिदौवारिकेण सह ताडनप्रतिताडने कृते आङ्गलप्राचार्येण सः छात्रः त्रिमासं महाविद्यालयान्निष्कासितः । कतिपयप्राध्यापकानां प्राचार्यस्य च छात्रसभायाम् अयोग्यव्यहवारस्य कारणेन कार्यस्थगनं तथा तीव्रमभवत् यथा तस्य प्रबला चर्चा समाचारपत्रेषु प्रारभत । एतस्य कर्यस्थगनस्य स्वम्भूर्नेता महेन्द्रप्रतापः अगण्यत । एतस्य कारणात् सः महाविद्यालयात् निष्कासितः । अभ्यासं परित्यज्य स गृहं प्रति निवृत्तः । अल्पदिनानि आग्रानगरे न्यवसत् एवमनेन प्रकारेण महेन्द्रप्रतापस्य छात्रजीवनस्य अकाले अन्तः उपस्थितः ।

प्रतिभासम्पननस्य छात्रस्य प्रखरदेशभक्तेः कारणतः जीवने महत्त्वपूर्णं परिवर्तनमुपस्थितम् । षोडशवर्षे वयसि महेन्द्रप्रतापस्य विवाहसंस्कारः जिन्दस्य महाराजस्य अनुजया भगिन्या सह अभवत् ।

मनुष्यः प्रचुरसाधनसम्पदायाम् आरक्तः स्यात् किन्तु पारिवारिकोत्तरदायित्वे उपस्थिते सामजिकीः राष्ट्रीयाश्च प्रवृत्तीः प्रति तस्य दुर्लक्ष्यता पूर्णतया सम्भाव्यते ।

महेन्द्रप्रतापः सर्वविधसुखवैभवे, पञ्चनदस्य एकेन महता शीखराज्येन सह विवाहसम्बन्धगौरवे तथा सांसारिकचिन्तानाम् अभावे सत्यपि मानसिकीं शान्तिं न अन्वभवत् ।

प्रायेण वैयक्तिकः असन्तोषः मानसिकशान्तिम् अपहर्तुम् उत्तरदायी भवति । परन्तु कतिपयविरलभारतभूमिजातानां जनानां मानसिकाशान्तिकारणानि भिन्नानि भवन्ति । धर्मस्य ह्रासः, परम्परायां विकृतिः, विधर्मिणामाक्रमणानि, विदेशीयशासनाधितले दासता इत्येतादृशैः असंख्यैः बाह्यैः कारणैः मानसिकीम् अशान्तिम् अनुभवतां संख्या भारते प्रतियुगं बहु महती भवति ।

महेन्द्रप्रतापः स्वं परितः यत्र दृष्टिम् अकरोत् तत्र यत् दृश्यम् अपश्यत् तेन तन्मनो विह्वलम् अभवत् स्वस्य निष्क्रियतायै च असन्तोषम् अन्वभवत् ।

भारतस्य पुनरुत्थानाय ये महानुभावाः स्वं जीवनवम् अर्पितवन्तः तेषां कार्यशैली

भिन्ना भिन्ना आसीत् तथाऽपि एका विशेषता सर्वत्र समाना प्रतीयते। भारतं स्वतन्त्रं कर्तुं भारतं ज्ञानं प्रथमसोपानं सर्वैः स्त्रीपुरुषैरङ्गीकृतम्। एतदर्थं भारतभ्रमणम् अथवा भारतमातुः प्रदक्षिणाकार्यम् आद्यशङ्कराचार्यात् आरभ्य स्वामिविवेकानन्दमहात्मागान्धिपर्यन्तं सर्वैः स्वकीय जीवनकार्यप्रारम्भे एव कृतम्।

भारतपरिक्रमया भारतमातुः सुपुत्रैः सह आत्मीयोभावः निर्मीयते। दीनदुःखिभ्यः बन्धुभ्यः किमपि सेवाकार्यं कर्तुं प्रबला इच्छा जागृता भवति। भारतविकासाय भारतोत्कर्षाय च निर्धनधनाढ्यान् ग्रामीणनागरिकान् वनवासिनः शिक्षितनिरक्षरान् सर्वान् सह गृहीत्वा चलितुं मनोभूमिका भारतभ्रमणेन निर्मीयते।

हिन्दुस्थाने सर्वतः साधारणजनसमाजे प्रसृता व्याप्ता निर्धनता, क्षुधामारिका, निरक्षरता, अशान्तिः एवं तदुत्पन्नानि सङ्कटानि यदा राजमहोदयस्य मनसि आरोहन्ति तदा तदीयं भावुकं तरुणं हृदयं विषादम् अन्वभवत्।

आङ्ग्लशासनसमये कतिपयानि राजराज्यानि तथाविधानि अपि आसन् तेषां प्रजायाः सुखदुःखैः सह सम्बन्धः न आसीत् स्वदेशस्य कोटिशः जनानाम् ईदृशीं दीनहीनावस्थां स्वसदृशमुष्टिभरधनिकैः सह राजमहोदयः यदा तुलनां करोति तदा तदीयं हृदयं कम्पितम् अभवत्। तस्य एतादृशी मनः स्थितिः सुचिरम् अभवत्। यदा हृदयं कम्पते तदा मनः चक्रारूढं चलति। विचार झंझावातं स्थिरीकर्तुम् अध्ययनस्य अभ्यासस्य आवश्यकता भवति। केवलम् अभ्यासेन विचाराः साकाराः न भवन्ति किन्तु अभ्यासेन सह साक्षात् अवलोकनम् अपि अपेक्षितं भवति। अभ्यासस्य अवलोकनस्य च आधारेण कृता योजना सुदृढं परिणामं जनयति।

राजमहोदयस्य मनसि विचार उत्पन्नः यत् अन्यदेशानां स्थितेः अपि अल्पम् अध्ययनं करणीयम् तथा तत्तद्देशेषु भारतसमान समस्यानां समाधानं कथं संशोध्यते तज्ज्ञानस्य आवश्यकता अनुभूयते।

एकस्मिन् समये सम्पूर्णविश्वस्य कृते कला-विज्ञान-कृषि-प्रभृतिसकलक्षेत्रेषु भारतं मार्गदर्शकम् आसीत्। ईदृशः सुवर्णयुगः बाह्यआक्रमणैः अपतत्। भारतस्य ज्ञानं सम्पत्तिश्च आक्रमणकारिभिः लुण्ठिता। भारतं कृपणम् अभवत्। लुण्ठकानां प्रदेशाः सम्पन्नाः अभवन्।

ईंग्लेन्ड देशे विज्ञानाधारितया औद्योगिकीप्रगत्या आर्थिकः विकासः तेजोगत्या समभवत् । भारतस्य समस्यानां समाधानाय अध्ययनविचारं मनसि निधाय १९०७ ईसवीय वर्षे राजमहोदयः सपत्नीकः प्रथमवारं युरोपप्रवासमगच्छत् । अस्यां विस्तृतयात्रायां युरोपदेशस्य औद्योगिकी प्रगतिः दम्पत्योः दृष्टौ अवसत् । भारते ईदृग्विधानाम् उद्योगव्यवसायानां सूत्रापातकरणस्य आवश्यकतां राजमहोदयः अन्वभवत् । स औद्योगिकप्रशिक्षणं सर्वविधोन्नतेराधारम् अमन्यत ।

अध्ययनाधारितसत्सङ्कल्पेन सह १९०८ ईसवीयवर्षे राजमहोदयः भारतं प्रतिनिवृत्तः । सङ्कल्पस्य मूलाधारः सद्विचारः भवति । सद्विचाररूपाधारे आदर्शस्वरूपस्य व्यवहाररूपप्रासादस्य निर्माणं भवति भवनार्थम् आवश्यकव्यवहाराय स्वस्य विशालता अनिवार्या अस्ति । स्वस्य विशालतायां सत्याम् अपि कौटुम्बिकसभ्यानां सङ्कुचितदृष्टिकोणेन कदाचित् सत्कार्ये अवरोधः उपस्थितः भवति । अतः स्वस्य यथा सज्जता क्रियते तथैव परिवारसदस्यानां संस्कारा अपि सज्जाः कर्तव्या अनिवार्याः भवन्ति ।

राजामहेन्द्रप्रतापः भारतं प्रतिनिवृत्य गभीरं विचारम् अकरोत् । स व्यचारत् । त्वदीयं वस्तु गोविन्दतुभ्यमेव समर्पये इत्थं सस्वस्य राज्यस्य सर्वां सम्पदं दरिद्रनारायण चरणेषु समर्पितवान् ।

महान् आदर्शविचारः एकस्याम् एव रात्रौ आचरणे स्थापयितुं न शक्यते । प्रत्येकं लक्ष्यं प्राप्तुं धैर्यस्य आवश्यकता भवति । राजमहोदयस्य कृते सम्पत्तिदानं सहसा कर्तुं शक्यं न आसीत् । तत् तस्मै व्यावहारिकम् अपि न प्रतीतम् अभवत् विधिनियमदृष्ट्या अपि आर्थिकसम्पदायां तस्य अपत्यानाम् अधिकारः आसीत् । सङ्कल्प-विकल्पविषये मनोमन्थनं कृत्वा तेन स्वसम्पत्तिः जनता जनार्दनस्य सेवायामर्पयितुं निर्णीतम् ।

सद्विचाराणामाचरणे कदाचित् भावनामश्वपूरस्य सर्जने सति योजनां साकारयितुं गतिरोधः उत्पद्यते । विचाराणां श्रेष्ठता तदाचरणाय बद्धपरिकरता अथ च सन्तुलितभावुकता आवश्यकी अस्ति । स्वस्य सम्पदायाः लोकसेवायां विनियोगः कथं कर्तव्यः इत्येतदर्थं राजमहोदयः पण्डितमदनमोहनमालविया सरतेजबहादुरसप्रेमहोदयाभ्यां सह विचारविमर्शम् अकरोत् । राजमहोदयः सत्पुरुषैः सह संवादस्य सत्सङ्गस्य च अनन्यां भारतीयपरम्पराम्

आचारे अस्थापयत् ।

यथा समुद्रमन्थनात् पश्चात् अन्ते अमृतकुम्भः प्राप्तः तथा भारतस्य तत्कालीनप्रतिकाराणां निवारणाय राजमहोदयस्य सङ्कल्पपूर्तये प्रेममहाविद्यालयस्य जन्म अभवत् । प्रेममहाविद्यालयः राजमहोदयस्य साधना सङ्कल्पविचारविनिमयानुभूतीनां जीवन् परिणामः अभवत् ।

राजपरिवारस्य विलासवैभवम्, प्रतिभासम्पन्नच्छात्रावस्थाया अकाले अन्तः, हिन्दुस्थानस्य जनतायाः कृते तीव्रभावना इत्येषां कारणात् राजमहोदयः स्वयं सामान्यजनतायै सर्वस्वं समर्पयितुं तत्परः अभवत् । तस्य जीवनस्य अनेकेषु आरोहावरोहेषु प्रेममहाविद्यालयस्य स्थापना एक महत्त्वपूर्णं सोपानम् आसीत् ।

●●●

प्रकरणम् - ४

प्रेममहाविद्यालय:

विचारेभ्य: क्रान्तिर्जन्म लभते। विचाराणां योग्यपोषणाय ज्ञानम् एवं शिक्षणम् आवश्यकम् अस्ति।

कस्यापि प्रकारस्य जातिसम्प्रदायविषयकभेदभावं विना युवकेभ्य: नि:शुल्कम् औद्योगिकं यान्त्रिकं प्रशिक्षणं दत्त्वा हिन्दुस्थाने व्यापारोद्योगस्य विकासस्य सूत्रपातं कर्तुं १९०९ ईसवीयवर्षे राजमहोदय: प्रेम महाविद्यालयस्य शुभारम्भम् अकरोत्।

१ अगस्त १९०२ दिने महाविद्यालयस्य प्रारम्भ: अभवत् अल्पे समये अर्थात् २४तम मई १९०९ दिने औद्योगिकविभाग: अपि आरब्ध:। औद्योगिकविभागस्य नियमानुसारं पञ्जीकरणम् अपि प्राप्तम्।

राजमहोदयस्य विचारव्यवहारयो: या: या: भावना: उल्लसन्ति स्म ता: अस्य शैक्षणिकसंस्थानस्य आदर्शायिता: अभवन्। समता, एकता, स्वतन्त्रता, देशभक्ति: सार्वभौम: भ्रातृभाव: अस्या: संस्थाया: आदर्शा: अङ्गीकृता:।

एतेषाम् आदर्शानां प्रयोजनाय मुख्ययोजना: हस्ते धृता:। सामान्यजनतायां प्राथमिकशिक्षणस्य प्रसारकरणम्, औद्योगिकयान्त्रिकोच्चशिक्षणव्यवस्थाकरणम्, स्वास्थ्यरक्षाहेतुकजागृति कार्याणां समायोजनम्, सामाजिककुरीतिव्यवहाराणां दूरीकरणाय प्रयत्नकरणम्, नश्यमान कुटिरोद्योगानामाधुनिकपद्धत्या पुन: स्थापना ईदृग्विधानि सदृढानि सोपानानि महाविद्यालयान्तर्गतानि प्रारब्धानि।

आदर्शव्यवहारे व्यवस्थापयितुं न केवलं पत्रे सुन्दरयोजना पर्याप्ता। प्रत्येककार्यस्य मुख्याधार: तत्कर्मणे योग्यजनानाम् अन्वेषणे निहित: अस्ति। राजमहोदयेन सहयोगिसङ्घ: रचित:, सज्जनानां संशोधने स्वयम् अवधानम् अददात्।

योग्यव्यक्तीनामनन्तरं धनस्य आवश्यकता भवति राजमहोदय: स्वस्य उदाहरणेन चलनशील: मानव: आसीत्।

इमां संस्थां विश्वविद्यालयं कर्तुं राजमहोदयः प्रारम्भात् एव अकाङ्क्षत । प्रथमे एव वर्षे २५०३५ रूप्यकाः १२ आणकाः २ पादिकाः तेन व्ययीकृताः । २५ अक्तुबर १९१० दिने स्वस्य अर्धसम्पदां पञ्चलक्षरूप्यकान् अस्यै संस्थायै समर्पितवान् ।

सत्संस्थानां स्तुत्यकार्याणि समाजः बहुवारं न जानाति संस्थायाः यदार्थसूचना अपि समाजस्य प्रत्येकस्तरपर्यन्तं प्रापयितुः अपि उत्तरदायित्वं संस्थायाः एव गण्यते तस्मात् हेतोः ५ अप्रेल १९११ दिने राजमहोदयः 'प्रेम'नामकं मासिकं वृत्तपत्रं प्रारब्धवान् । दिसम्बर मासे इदं वृत्तपत्रं संस्थायाः मुखपत्रं कारितम् ।

राजमहोदयः स्वयं 'प्रेम'-मासिकस्य तन्त्री अभवत् । संस्थायाः आदर्शान् लोकपर्यन्तं प्रापयितुम् ।

एवं च तन्त्रिलेखमाध्यमेन लोकजागृतिदेशभक्तिजागरणसदृशविषया अपि मुद्रिता अभवन् ।

कस्या अपि संस्थायाः सूत्रधाराः आरम्भशूरा न सिद्ध्यन्ति, तस्य चिन्ता कर्तव्या भवति । आरम्भानन्तरं सततविकासाय प्रगत्यै च विशेषाध्ययनस्य तथा कलनायाः आवश्यकता भवति । सूत्रधारः संस्थायाः सर्वेषु कर्मसु वैयक्तिकरस रुचिं कृत्वा रुधिरस्वेदम् एकीकृत्य च संस्थायाः विकासः गतिं प्रापयेत् ।

१९०९ तमवर्षे संस्थायाः विकासार्थे विदेशगमनाय विचारम् अकरोत् परन्तु राजामहेन्द्रप्रतापः स्वास्थ्यवदिपरिणामात् सः पश्चात् १९११ तमवर्षे द्वितीयवारं युरोप प्रवासमगच्छत् । सर्वेषां देशानां शैक्षणिकसंस्थानाम् अध्ययनं निरीक्षणं च अकरोत् । ईंग्लेन्डदेशस्य संस्थानां सविशेषं सूक्ष्मं निरीक्षणम् अकरोत् ।

युरोपदेशात् भारतं प्रतिनिवृत्य राजमहोदयः भारतस्य प्रदेशेषु शैक्षणिकसंस्थानां निरीक्षणाय भ्रमणमारभत । १९१३ ईसवीयवर्षे दक्षिणभारते प्रवासमकरोत् ।

अस्मिन् समयखण्डे एव तस्य पुत्ररत्नम् अजायत । भारतीयजीवनशैल्यां प्रत्येको जनः स्वस्य सुखदुःखानां विभजनपरम्पराया विकासम् अकरोत् । अस्याः पद्धत्याः प्रखरोपासकः राजमहोदयः आसीत् अत एव पुत्रजन्मनिमित्ते दशरूप्यकाणां चत्रसः

शिष्यवृत्तयः उद्घोषितास्तेन । अपि च पुत्रस्य भागस्य ग्रामेषु प्राथमिकविद्यालयमुद्घाटयितुं पञ्चविंशतिसहस्ररूप्यकाणां दानं घोषितवान् ।

प्रेममहाविद्यालयस्य वार्षिकोत्सवे प्रतिवेदनप्रस्तावे राजमहोदयः हृदयस्पर्शि व्याख्यानं कुर्वन् अवदत् यत् शिक्षणरूपेण चर्मणा एव अस्माकम् अज्ञानतामिथ्यान्ध-विश्वासशत्रुभ्योऽस्माकं रक्षां कर्तुं शक्ष्यामः । ज्ञानप्रकाशेन अस्माकं देशात् अज्ञानम् अन्धकारं दूरीकर्तुं वयं सिद्धाः स्मः ।

प्रेम मासिकं ८ अक्तूबर १९१३ तः साप्ताहिकं जातम् अस्यां पत्रिकायाम् अनेकवारं हिन्दुस्थानस्य राजकीयस्थितिविषये चर्चा मुद्रयते स्म तेन कारणेन समये समये आङ्गलशासनस्य प्रकोपस्य लक्ष्यतां पुत्रिकैषा प्राप्नोति स्म । राजमहोदयस्य क्रान्तिकारीहृदयं सम्पादकीयलेखेषु अभिव्यक्ति बभूव । औद्योगिकतान्त्रिकशिक्षणं केवलं पुस्तकीयज्ञानान्तसीमितं तिष्ठेत् तदा तस्य लाभो नास्ति, एतत् राजमहोदयो जानाति स्म, प्रशिज्ञक्षणं प्राप्य युवानः स्वाश्रयाः स्वावलम्बिताः भवन्ति तथा व्यापारोद्योगमाध्यमेन समाजे स्वदेशिभावजागरणं कर्तुं शक्नोति तदर्थं १९११ ईसवीयवर्षे महाविद्यालयस्य कलागृहम् एवं स्वीयं मुद्रणालयं प्रारब्धम् ।

१९१३ ईसवीयवर्षे यस्य मार्गदर्शनात् प्रेरणया च राजमहोदयः प्रेमविद्यालयस्य प्रारम्भमकरोत् स पण्डितमदनमोहनमालविया महाविद्यालयस्य दर्शनं कर्तुमागच्छत् । पण्डितजि पदार्पणेन महाविद्यालयः पावनः अभवत् । पण्डितवर्यः संस्थायाः प्रगत्या परमसन्तोषम् अभिव्यक्तम् अकरोत् । १९१३ तमे वर्षे प्रान्तः राजपालः अपि महाविद्यालयस्य दर्शनाय आगच्छत् ।

१९१३-१८ तम वार्षिकोत्सवे सम्बोधनं कुर्वन् राजा महेन्द्रप्रतापः अकथयत् यत् "अस्माकं लक्ष्यम् एवं मार्गः सर्वथा भिन्नः अस्ति । अस्माकं लक्ष्यं समाजं स्वावलम्बितं कर्तुम् अस्ति । धनं नास्ति, परन्तु अस्माकम् उद्देश्यम् अस्ति । अस्मिन् वार्षिकोत्सवे एव राजमहोदयः महाविद्यालये सम्पूर्णनिःशुल्कशिक्षणप्रदानस्य घोषणाम् अकरोत् ।"

२ अक्तूबर १९१४ दिने महाविभूतिर्महर्षिः रविन्द्रनाथ-ठाकुरः महाविद्यालये समागतवान् । तेन संस्थायाः दर्शनं कृत्वा अभिप्रायोन्यलेखियत् "महाविद्यालये यत्किमपि

दृष्टम् तत मम मनसि गभीरं प्रभावमपातयत् अहं संस्थायाः सर्वविधां सफलताम् इच्छामि ।"

योगानुयोगं प्रेममहाविद्यालयः १९१४ ईसवीयवर्षे भारतस्य अपरस्य महाविभूतेः पुरुषस्य आतिथ्यलाभं प्राप्तवान् । मह त्मा गान्धी महाविद्यालयं द्राष्टुमागच्छत् अभिप्रायं च अलिखत् यत् महाविद्यालयं दृष्ट्वा मम मनसि अनेके विचाराः उद्भवन् । अत्र एकम् अपि वस्तु तादृशं नास्ति यत् दर्शनीयं न भवेत्, संस्थायाः संस्थापकाय यावन्ति अभिनन्दनानि दीयन्ते तानि अल्पानि गणयिष्यन्ते ।

भारतेतिहासे एका लाक्षणिकता उड्डीय अक्षिणि लगति । अनेकेषां मतानां सम्प्रदायानां सेवासंस्थानाम् अन्यान्यसंस्थानां संस्थापकाः स्थलान्तरं गच्छन्ति अथवा तेषां मरणं भवति तदनन्तरं तैः स्थापितानां संस्थानां प्रगतिः अवरुद्धा जाता अस्ति । इदृशानि अपि उदाहरणानि सन्ति यत्र कालक्रमे संस्थापकस्य प्रस्थानानन्तरं संस्था अपि मरणं प्राप्नुयात् ।

राजमहोदयः अनया घटनया अवगत आसीत् तदर्थं दिसम्बर १९१४ तमे वर्षे विदेशगमनात् पूर्वं महाविद्यालयस्य योग्य विकासाय प्रगत्यै च विशेषप्रबन्धम् अकरोत् ।

दिसम्बर १९१४ तमवर्षे राजमहोदयः महाविद्यालयसञ्चालनाय व्यवस्थापकसमितेः सङ्घटनम् अकरोत् । महाविद्यालयस्य केन्द्रियकार्यालयद्वारा सर्वव्यवस्थानां निरीक्षणकरणस्य व्यवस्था निर्धारिता ।

राजमहोदयः विदेशं गन्तुं प्रस्थितस्तदा महाविद्यालयस्य छात्राणां संख्या २५० पर्यन्तं प्राप्ता आसीत् तस्य अनुपस्थितौ व्यवस्थापकसमित्या १९१६ वर्षे महाविद्यालयस्य कलागृहस्य च पृथक्करणं कृतम् । कलागृहे विभिन्नानाम् अभ्यासक्रमाणां समावेशः कृतः । १९२२ वर्षे सीवनकर्म शिक्षितुं महिलानां पृथग्वर्गस्य प्रारम्भः अभवत् ।

राजमहोदयः शिक्षणद्वारा अन्धकारं दूरीकर्तुं वार्ताम् अकरोत् । युवधनं शिक्षणद्वारा सदसद्भेदं सम्बुध्येत तस्य सावधानतां राजमहोदयः अरक्षत् । १९२०-२१ वर्षे स्वतन्त्रतान्दोलने वेग आगतः । १९२९ वर्षे लोहोरनगरे पूर्णस्वराज्यस्य निर्धारः पारितः अभवत् । ततः प्रतिवर्षम् २६ जनवरी दिवसः स्वातन्त्र्य दिवसः इति महाविद्यालयः उत्सवं प्रारभत ।

संस्थायाम् उच्चादर्शकारणात् निश्चितप्रकारकं वायुमण्डलम् उद्गतम् ।

वायुमण्डलकारणात् न केवलं छात्रेषु अपि तु प्राचार्यप्राध्यापकसहितानां सर्वेषां मनस्सु वायुमण्डलस्य व्यापकः प्रभावः समुत्थितः ।

सायमनकमिशनबहिष्कारः लवणसत्याग्रहः इत्यादिनां स्वातन्त्र्यान्दोलनेषु महाविद्यालयस्य प्राचार्याः प्राध्यापकाः छात्राश्च कूर्दिताः । महाविद्यालयं विधिनियमवर्जितं निर्धार्य आङ्ग्लशासनमुद्रां दत्त्वा विहितवान् । १९३८ पर्यन्तं महाविद्यालयः विहित आसीत् ।

समयचक्रं भ्रमदासीत् । १९०८ वर्षे महाविद्यालयस्य प्रारम्भः अभवत् । १९३८ पर्यन्तं स्वतन्त्रतान्दोलनप्रभावे महाविद्यालयः पिहितः ततः पुनः महाविद्यालयस्य प्रारम्भः अभवत् । महाविद्यालयस्य कर्णधारः राजमहोदयः हिन्दुस्थानाय स्वातन्त्र्यं प्रदातुं त्रिदशकं विदेशेषु अवसत् । स्वप्राणप्रियमहाविद्यालयस्य विशालभवनस्य निर्माणकार्यं १९४८ वर्षे पूर्णतोपकण्ठमागतम् । राजमहोदयस्य अनुपस्थितौ नूतनं भवनं निस्तेजस्कमिव भासते स्म ।

एका कलिका अधुना पूर्णविकसितपुष्पम् अभवत् । तदा पुष्पपोषकः मालिकः उपस्थितः न स्यात् तत् परमकृपालोः प्रभोः मान्यं भवेत् खलु ? नूतनभवनस्य शुभारम्भावसरे सहसा एव त्रिदशकानन्तरं राजमहोदयः स्वदेशं प्रतिनिवृत्तः ।

●●●

प्रकरणम् - ५

उन्नतम् उड्डयनम्

१९१४ वर्षे विश्वयुद्धज्वालाः युरोपदेशे व्याप्ता आसन् ईंग्लेन्डदेशस्य च कृते निकटा समस्या उत्थिता आसीत् । आङ्ग्लसाम्राज्यवादस्य मूलाधारे सङ्घर्षः शोषणं स्वार्थश्चसमाहिताः आसन् । साम्राज्यवादिशासनम् ईदृग्भिः कुकर्मभिः स्वसामार्थ्यं वर्धयितुं शक्नोति ।

विश्वयुद्धस्य स्फोटने साम्राज्यवादिनी मानसिकता एव उत्तरदायिनी आसीत् । निर्बलं दमित्वा सङ्घर्षं कृत्वा, शोषणं विधाय स्वदेशस्य विलासवैभवाभिवृद्धिं कर्तुं विभिन्नभूभागेषु अधिपत्यं स्थापयितुं मनीषायाः कारणात् एव विश्वयुद्धस्य प्रारम्भः अभवत् ।

राजमहोदय आन्तरराष्ट्रीयपरिस्थित्याः बहु गभीरमध्ययनं कृत्वा तत्कालीन परिस्थितीनां लाभं गृहीत्वा स्वदेशं स्वतन्त्रं कर्तुं प्रयत्नेषु स्वजीवनं सम्पूर्णतया यापयितुं सङ्कल्पमकरोत् ।

आन्तरराष्ट्रीयमञ्चोपरि सक्रियोभवितुं विशेषकौशल्यस्य आवश्यकता अस्ति । विभिन्नदेशेषु परस्परं सम्बन्धतः सूचनाः अवगत्य स्वदेशहिते युक्तिप्रयुक्तिकरणे सावधानता आवश्यकी अस्ति ।

विश्वयुद्धसदृशतरलपरिस्थित्यां युक्तिप्रयुक्तिभिः सह समयसूचकताया अपि अनन्यं महत्त्वं राजमहोदयः जानाति स्म । ईदृशजटिलपरिस्थित्याः महत्तमलाभं ग्रहीतुं प्रभावकं नेतृत्वं प्रदातुं सर्वाभियानेषु अग्रसरतां विना अन्यः विकल्पः एव नास्ति स विषयस्तस्य ध्याने आसीत् ।

मुष्टिमित्तलोकानां हस्ते कोटिशो भारतवासिनो जनाः दासीभूय तिष्ठेयुरिति दृश्यं राजमहोदयस्य असह्यम् अभवत् हृदयस्य तीव्रवेदनया स अधीरः अभूत् । राजमहोदयः एवमन्यत् यत् विश्वयुद्धे यदि जर्मनदेशः ईंग्लेन्डदेशं पराजयेत तदा जर्मनदेशस्य साहाय्येन स्वदेशं स्वाधीनं कर्तुं शक्यं स्यात् । स्वस्य मित्रैः सह अस्मिन् विषये चर्चाविचारणां कृत्वा

अन्ते एवं निश्चितम् यत् राजमहोदयः स्वयं युरोपदेशं गत्वा जर्मनदेशस्य साहाय्यं प्राप्तुं प्रयत्नं कुर्यात् ।

युरोपदेशगमनविचारे मग्नः राजमहोदयः अल्पदिवसान् दहेरादूनं गतः । एकदिवसे संयुक्तप्रान्तसभायाः अध्यक्षः पुरुषोत्तमदासटन्डनस्तस्य मेलनार्थम् आगतः । जर्मनस्य सहायता विषये उभयोर्वार्तालापः अभवत् । श्रीटन्डनस्य मतमासीत् यत् रशिया देशगमने अधिकलाभः अस्ति परन्तु विश्वयुद्धे रशियादेशः ईंग्लेन्डदेशस्य सहायकः आसीत् । श्रीटन्डनस्य मते रशियादेशः कृषिप्रधानः देशः अस्ति तेन हिन्दुस्थानेन सह अधिकं साम्यं दधाति तेन तस्य सहानुभूतिः भारतं सहजतया प्राप्नुयात् ।

शुभकार्येषु अवरोधानामागमनं स्वाभाविकं मन्यते प्रथम ग्रासे मक्षिका सदृशः अनुभवः राजमहोदयस्य अप्यभवत् सः पासपोर्ट-पत्रार्थम् आवश्यकं कार्यवाहनस्य प्रारम्भम् अकरोत् । स्विझरलेन्डदेशं गन्तुम् अनुमतिम् अयाचत् । स्वाधीनताप्राप्तेः प्रचण्डावेगाकारणात् अनुमतिप्रतीक्षां न कुर्वन् राजमहोदयः मोहमयीपुरीं गतवान् ।

मोहमय्याम् इटालियननौकायां थोमसकुकएण्डसन्सनामकसंस्थानतः स्वचिट्टिकायाः प्रबन्धम् अपि अकरोत् । नौकासत्ताधिकारिणाः पासपोर्टपत्रकं विना प्रवासं कारयितुं तत्पराः न आसन् । थोमसकुकएन्डसन्ससंस्थानं राजमहोदयस्य ईंग्लेन्डदेशं गन्तुं विना सीमातिक्रमपत्रं व्यवस्थाम् अकार्षीत् ।

प्रखरक्रान्तिकारिस्वामिश्रीश्रद्धानन्दस्य ज्येष्ठपुत्र श्रीहरिश्चन्द्रविद्यालङ्कारं सहायकरूपेण गृहीत्वा २८ दिसम्बर १९१५ दिने पी.एन्ड पी. नौकायं विना सीमातिक्रमणपत्रं लण्डनदेशं गन्तुं भारतमातुः पावनः पुत्रः राजा महेन्द्रप्रतापः प्रातिष्ठत ।

जिनीवास्थाने स्वसङ्केते सीमातिक्रमपत्रकं प्रापयितुं थोमसकुकएण्डसन्स-संस्थानं संसूच्य आगच्छत् ।

विश्वयुद्धस्य भीषणता व्याप्ता बभूव । रक्तसागरे एव नौका युद्धज्वाला अन्वभवत् । अत्रैव नौकायाः सर्वे गवक्षाः विहिता अभूवन् अलन्दाः पिहिताः, नौकायाः आभ्यन्तरः प्रकाशः यथा बहिर्निगच्छेत् तथा सम्पूर्णा व्यवस्था कृताऽभूत् जर्मनदेशस्य अन्तस्पोतस्य आक्रमणभयात् एषा सतर्कता रक्षिता आसीत् ।

नौकायां भूमध्यसागरं प्राप्तायाम् एव सङ्कटं बहु विकटम् अभूत् । वास्तविकं भयं तु अत्रैव आसीत् । राजमहोदयस्य नौकानायकः भयात् सङ्कटाच्च रक्षणाय सर्वान् उपायान् अनुसृतवान् बहुवारं नौकामार्गं परिवर्तयितुं परवशताम् अपि स्वीकृतवान् ।

.... परन्तु राजमहोदयस्तु एकस्य कवेः कल्पनानुसारं ध्येयपथे अग्रे अग्रे एव अगच्छत् ।

नास्ति भयं झंझावाताद् वारिदात् अथवा अग्निशिखायाः नास्ति भयं धूर्तजगतः कपटस्य आघातात् नयने ध्रुवध्येयानुरूपं दृढम्........

भावभरं....

●●●

प्रकरणम् - ६

आङ्ग्लशासनस्य क्रौर्यम्

नौका मार्सलीजस्थानं प्राप्ता । नौका स्विट्झरलेन्डदेशं गत्वा जर्मनदेशं प्राप्नुयात् अथ च राजमहोदयः महतः अभियानस्य प्रारम्भः स्यात् तत्प्रागेव भारते तस्य परिवारस्योपरि कृष्णात्याचारवर्षणस्य दुष्कृत्यं क्रूरा आङ्ग्लशासका अकुर्वन् ।

युरोपदेशस्य सङ्केते प्रेषितानि पत्राणि धनादेशश्च राजमहोदयाय न प्राप्यन्ते हिन्दुस्थानं प्रति न्यवर्तन्त । एतस्मात् कारणात् परिवारजनेषु चिन्ता उद्भवत् । अनेकेषु प्रयत्नेषु सत्स्वपि राजमहोदयस्य सूचना न प्राप्नोति स्म । अतः कुमारहुकमसिंहेन वर्तमानपत्रेषु विज्ञापनं प्रसारितम् ।

जीनिवादेशे एकस्य ख्रिस्तसाधोः गृहे राजमहोदयः अल्पसमयं न्यवसत् । तस्य ख्रिस्तसाधोः हस्ते तद् विज्ञापनयुक्तं वर्तमानपत्रम् आगतम् । ख्रिस्तसाधुः राजमहोदयः सकुशलः अस्ति, निश्चितसङ्केते प्राप्ते ज्ञापयिष्यामि इति पत्रं भारते न व्यलिखत् ।

भारतस्य आङ्ग्लशासनं राजमहोदयः विद्रोही अस्ति विज्ञाप्य तदीयां सर्वां सम्पदं स्वायत्तीचकार । राजमहोदयस्य पत्न्या बालकानां च निर्वाहाय निश्चितधनराशिः प्रदत्तः ।

१९२३ वर्षे इम्पिरीयल काउन्सिलमध्ये एतद्विषये एकः विशेषविधिनियमः निर्मितः । राजमहोदयस्य सुपुत्रः श्रीप्रेमप्रतापः सम्पूर्णसम्पदायाः वेतनग्राही प्रबन्धकः इति स्थित्यां स्थापितः ।

राजकीय परिषदि ततश्च ईंग्लेन्डसंसतसभायां चर्चायाम् अपि राजा महेन्द्रप्रतापः चकितः । चर्चायाम् उत्तरं ददता एवं ज्ञापितं यत् १९१६ वर्षस्य मई-मासतः राज्ञो महेन्द्रप्रतापस्य युरोपविद्रोहिकार्यवहनम् आङ्ग्लशासनं जानाति । अतस्तस्य सम्पदा स्वायत्तीकृता एवं सः युरोपदेशे स्वसम्पदायाः उपयोगं न कुर्यात् तदर्थम् अपि आवश्यककार्यवहनं हस्ते धृतम् अस्ति ।

ब्रिटनदेशस्य संसदि एवं ज्ञापितं यत् राजमहोदयः भारतं प्रति पुनरागच्छेत् तर्हि आङ्ग्लशासनस्य विरोधः नास्ति । न्यायालयद्वारा तस्योपरि उचितकार्यवहनं भविष्यति एवम् अपि संसदं प्रति उक्तम् अभवत् ।

प्रतिमासं भूमिकृषिप्रभृतिभ्यः दशसहस्ररुप्यकाणि राजमहोदयः प्राप्नोति स्म । वर्षे प्रायेण सार्धद्वाविंशतिसहस्ररुप्यकाणां रक्षणं भवति स्म । १९१९ वर्षतः तस्य पत्न्यै मासिकं द्विशतरुप्यकात्मकं धनं तथा बालकेभ्यः चतुःशतात्मकं धनं दातुं प्रारभ्यत । बालकानां रक्षणार्थकराशितः एकस्याः युरोपदेशीयधात्र्याः वेतनं दातुम् उत्तरदायित्वम् अपि शासनं परिवारोपरि एव अस्थापयत् ।

राजमहोदयः आङ्ग्लशासनस्य असत्यानि प्रति स्वीयं प्रतिभावम् ईन्डिपेन्डन्टवर्तमानपत्रे लेखे लिखित्वा प्रकाशितवान् राजमहोदयः स्वयं महायुद्धे आङ्गलशासनस्य शत्रुभ्यः साहाय्यं करोति इति तादृशान् मिथ्यासमाचारान् प्रति आश्चर्यम् अभिव्यक्तवान् ।

स्वलेखे राजमहोदयः ज्ञापितवान् यत् १९१४ वर्षे दिसम्बरमासे हिन्दुस्थानं परित्यज्य फ्रान्सदेशम् अगच्छत् । ततः स्विट्झरलेन्डदेशम् इटालीदेशं गत्वा जर्मनदेशं प्राप्तवान् जर्मननेता कैसरेमहोदयः मानसम्मानेन सह तस्य स्वागतम् अकरोत् ।

जर्मनदेशात् तुर्कीदेशं प्राप्य सुलतानमहमुद-पञ्चमं मिलितवान् । तुर्कीदेशस्य सुलतानः तथा जर्मनदेशस्य नेता कासरः च उभौ राजमहोदयम् अफघानिस्तानदेशस्य अमीरं मेलितुम् अकथयताम् एवं परिचयपत्रम् अपि अदत्ताम् ।

राजमहोदयः स्वयं जर्मनतुर्कीदेशयोः अधिकारी तथा मौलानाबरकतउल्ला महोदयेन सह भूमार्गेण काबूलप्रदेशं प्राप्तः १९१५ तः १९१८ वर्षमध्ये अफघानिस्तानदेशस्य अमीरस्य सेवामाराजमहोदयः अतिष्ठत् । अफघानिस्तानदेशात् रशियादेशं गत्वा जर्मनदेशं प्राप्तः । अफघानदेशस्य अमीरेण प्रदत्तं पत्रं जर्मनदेशस्य शासकाय कासराय दत्तम् १९१९ वर्षस्य वसन्तपर्यन्तं युरोपदेशे स्थितः ।

अग्रे पुनः अफघानयुद्धस्य समाचारे प्राप्ते राजमहोदयः काबूलनगरं प्राप्तः । अमीरेण चीनदेशस्य राष्ट्रपतये दलाईलामाय तथा जापानदेशस्य राजाधिराजाय पत्राणि

दत्तवान् । राजमहोदयः चीनीतुर्किस्तानात् तिबेटदेशं गन्तुम् ऐच्छत् । परन्तु आङ्गलसंसदध्यक्षस्तं गमनाय प्रेरणां न अददात् चीनीराष्ट्रपतये पत्रं प्रेषितवान् । ततश्च काबूलनगरं प्राप्य पुनः युरोपदेशं प्राप्तः ।

लेखस्य अन्ते आङ्ग्लभ्रामकप्रचारप्रतिवादं ददानः राजमहोदयः अलिखत् यत् तस्य विश्वभ्रमणस्य प्रमुखमुद्देश्यं धार्मिकम् अस्ति । तथाऽपि राजनीत्याः सः बहिष्कारं न करोति । सः यत्किमपि कथयति तत्र धार्मिकता मानवता च केन्द्रे दृश्येते । एवमपि इदानीं स अफघानिस्तानदेशस्य नागरिकः अस्ति, लेखे तथाविधोऽपि उल्लेखः कृतः अभवत् ।

देशहिताय वयं जीविष्यामः

देशहिताय वयं मरिष्यामः ।

एतां कविहृदयस्य कल्पनां राजा महेन्द्रप्रतापः व्यवहारे स्थापितवान् आङ्ग्लशासनस्य विरोधं च चकार ।

•••

प्रकरणम् - ७

विदेशे स्वदेशार्थं पौरुषम्

राजमहोदयस्य नौका भूमध्यसागरे प्राप्ता । सः तारसन्देशं प्राप्तवान् यत् मार्सेलीजनगरं प्राप्य अग्रिमं प्रवासं कुर्यात् । मार्सेलीजनगरं प्राप्य स्थानिकब्रिटीशपरिषदः अनुमतिं गृहीत्वा राजमहोदयः स्वस्य सहायकेन श्रीहरिशचन्द्रेण सह रेलमार्गे स्वीट्झरलेन्डदेशं प्राप्तवान्, स्वीट्झरलेन्डदेशतः जर्मनदेशस्य सम्पर्कः दुःसाध्यः न आसीत्, तदेतत् राजा महेन्द्रप्रतापो जानाति स्म ।

ध्येयपथे अग्रेसरन् पथिकः निसर्गतः सहायतां प्राप्नोत्येव । नौकायाम् एकः इजीप्तयुवकः परिचितो जातः सः युवकः राजमहोदयस्य स्वीट्झरलेन्डदेशे जीनिवानगरे स्थितस्य श्रीश्यामकृष्णवर्मणः सङ्केतम् अयच्छत् । श्रीश्यामकृष्णवर्मा हिन्दुस्थानस्य क्रान्तिकारिणां सर्वमहान् आश्रयदाता आसीत् । समयेन सह धावनस्य प्रारम्भं राजमहोदयः जीनिवानगरं प्राप्य अकरोत् । श्रीश्यामकृष्णवर्माणम् अन्विष्य तस्य पार्श्वात् राजमहोदयः लाला हरदयालस्य सङ्केतं प्राप्तवान् । लालाजिः नगरात् दूरे एकान्ते निवसति स्म । अल्पम् अपि समयव्ययम् अकृत्वा भाटकवाहनं गृहीत्वा राजमहोदयः लालाजिसमीपं गतवान् । लाला हरदयालः भोजनाय आलुकान् उत्कालयति स्म । राजमहोदयस्य सहर्षं स्वागतं कृत्वा उभौ सुचिरं वार्तालापम् अकुरुताम् । युद्धस्य परिस्थितिः हिन्दुस्थाने क्रान्तिसम्भावना, बहिर्देशात् आक्रमणतत्परता, तदर्थं च आवश्यक सहायताप्राप्तिः इत्यादिविषयेषु वार्तालापः अभवत् ।

राजमहोदयः लालाजिमहोदयमपृच्छात् यत् सः किमर्थं जर्मनदेशे न गच्छति इति, सः उक्तवान् यत् जर्मनदेशे कतिपययुवकाः सङ्गत्य सक्रियाः भवन्ति एव ।

द्वितीयदिवसे एव लालाजिः महेन्द्रप्रतापं जर्मनदेशस्य राजदूतं मेलयितुम् अनयत् । एतन्मेलनम् सर्वथा सावधानतया एवं गुप्तवातावरणे समायोजितम् आसीत् । राजदूतः राजमहोदयं जर्मनदेशं गन्तुम् असूचयत् । राजमहोदयः अपृच्छत् यत् जर्मनशासक कैसरमहोदयस्य मेलनं भविष्यति वा ? अस्य उत्तरं स्पष्टतया दातुं राजदूतः न प्राभवत् ।

कैसरमहोदयस्य मेलनस्य अनिश्चिततया राजा महेन्द्रप्रतापः दुःखी एवं निराशो

जातः । जर्मनदेशस्य गमनविचारं परिवर्त्य नेपल्सतः अमेरिकादेशं गन्तुं विचारम् अकरोत् । तदा एक सहायकस्य श्रीहरिशचन्द्रस्य तारसन्देशे प्राप्ते जीनिवानगरं प्रतिनिवृत्तः । थोमसकुकएन्डरसन्ससंस्थानद्वारा सः स्वकीयं सीमातिक्रमपत्रं प्राप्तवान् । विश्वयुद्धस्यपरिस्थितेः अध्ययनं कर्तुं युरोपदेशस्य अमेरिकादेशस्य च सानफ्रान्सिस्कोनगरे समायोक्ष्यमाणप्रदर्शनेषु गन्तुम् अनुमतिः अपि सीमातिक्रमपत्रेणसह प्राप्ता ।

अल्पदिनानि इटालीदेशे भ्रमित्वा जिनीवानगरम् आगतः राजमहोदयः रेलयानप्रवासे एकं ब्रिटीशाधिकारिणं मिलितवान् । महायुद्धे जर्मनदेशस्य पराभवः भविष्यति अतः राजमहोदयः जर्मनदेशं गच्छेत् इति तस्य संसूचना आसीत् ।

जीनिवानगरं प्रतिनिवृत्य राजा महेन्द्रप्रतापः श्रीमती सरोजिनीनायडु देव्याः भ्रातरं श्रीहीरेन्द्रनाथचट्टोपाध्यायं मिलितवान् । विश्वयुद्धस्य परिस्थितिः, जर्मनदेशं गत्वा कौसरमहोदयस्य मेलनस्य अल्पसम्भावना इत्यादिविषयेषु उभयोः वार्तालापः अभवत् । श्रीचट्टोपाध्यायः राजमहोदयस्य त्यागभावनां सदा कस्याचिदपि प्रकारस्य सङ्कटं धारयितुं वृत्तैः प्रशंसाम् अकरोत् । जर्मनदेशगमनानन्तरं कैसरमहोदयः राजमहोदयाय मेलनस्य प्रतिषेधं कथङ्कारं कुर्यात् ?

इदानीम् एव राजमहोदवयस्य स्वदेशस्य स्वाधीनताप्राप्तये रणस्य महत्त्वपूर्ण समयः प्रारब्धः । श्रीचट्टोपाध्यायेन सह राजमहोदयः बर्लिनदेशं गन्तुं प्रस्थितः । यात्रापूर्वे जिनीवा स्थितं जर्मनदेशस्य राजदूतं मिलित्वा तद्द्वारा यात्रायाः पूर्णां व्यवस्थां सम्पादितवान् । लालाहदयालः पूर्वम् एव जर्मनदेशं प्राप्तवान् आसीत् ।

स्वीसजर्मनदेशयोः सीमायाम् उभयोः समीपात् सीमातिक्रमपत्रे याचिते सति जीवस्तालुनि सक्तः अभवत् । परन्तु श्रीचट्टोपाध्यायः जर्मनभाषां जानाति स्म । अधिकारिणः कर्णे वार्तायां कृतायां सद्य एव द्वयोर्जर्मनप्रवेशाय अनुमतिः प्राप्ता । सत्यपथे चलतां परीक्षा अवश्यं भवेत् परन्तु सफलतायाः प्राप्तिस्तु भवत्येव ।

जर्मनदेशे प्रवेशसमस्यातः मुक्तिं प्राप्य बर्लिननगरे प्राप्ते द्वितीया समस्या आपतिता । राजमहोदयस्य पार्श्वे धनं रिक्तं जातम् । स्वस्य सम्पदाप्रबन्धकाय बहुवारं तारसन्देशे प्रेषिते अपि भारतात् धनं न आगतम् । अल्पदिवसान् बर्लिननगरस्य

एकस्मिन् प्रकोष्ठे स्थित्वा अग्रे किं कर्तव्यम् तस्य आयोजनम् अकुरुताम् । तदा एव तस्य सहायकः श्रीहरिश्चन्द्रः थोमसकुकएन्ड -सन्स-संस्थान द्वारा भारतात् आगतं धनम् आदाय बर्लिननगरं प्राप्तः ।

जर्मनशासनद्वारा राजमहोदयस्य ऊष्मभरितं स्वागतं कर्तुं जर्मनदेशस्य विदेशविभागस्य उच्चाधिकारी तथा कराञ्चीनगरस्य पूर्वराजदूतः श्रीन्यूनहोफरमहोदयः राजमहोदयेन सह पूर्णसमयं सहैव तिष्ठेत् तादृशी व्यवस्था कृता ।

स्वागतम् अथवा मानसम्मानस्यौपचारिकता न महत्त्वं धारयति । परस्परसम्बन्धगहनता कियता प्रमाणेन विलासिता अस्ति । तस्य मानदण्डः प्राप्तव्यः आन्तरराष्ट्रीयसम्बन्धेषु महत्त्वपूर्णः भवति । भारतस्य अग्रगण्यनेतारः अथवा ब्रिटिश शासनस्य उच्चस्थानाधिरूढाः हिन्दुस्थानीयाः यादृशम् अवसरं न प्राप्तवन्तः तादृशः अवसरः राजमहोदयाय जर्मनशासनेन स्वयम् एव दत्तः । विश्वयुद्धे संलग्नानां देशनां प्रमुखनेतारः अपि कदाचित् यत् द्रष्टुं वञ्चिता आसन् तादृशं महायुद्धस्य विराडजीवद्दृश्यं दृष्टुं राजमहोदयाय निमन्त्रणं पाठितम् अभूत् ।

राजमहोदयस्य जीवने एषः एकः स्वर्णिमः अवसरः आसीत् । भारतस्य स्वाधीनतायै विश्वयुद्धस्य अनन्तरं जर्मनदेशस्य सहायताप्राप्तिः भविष्यति तादृशः विश्वाससेतुः बद्धः । विश्वयुद्धस्य प्रत्यक्षदर्शनाय जर्मनदेशस्य पूर्वीयक्षेत्रस्य रणाभियाने राजमहोदयः साक्षात्कारार्थं नीतः अभवत् । भारतस्य एकस्य राज्यस्य राजा, एक शैक्षणिकसंस्थानस्य सूत्राधारः एतादृशस्य राजमहोदयस्य हृदये प्रखरदेशभक्तेः अनुभूतेः भावनायाः कारणात् एव जर्मनशासनम् इमां योजनाम् अकरोत् स्यात् इति मान्यतायाम् अपि काचित् शङ्का ज्ञायते । अस्याः रणभूमेः साक्षात्कारे तुर्कीसंसदः उपप्रमुखः श्रीअब्दुलकरीमबेगमहोदयः अपि राजामहेन्द्रप्रतापेन सह युक्तः आसीत् ।

लोर्डजस्थाने फिल्डमार्शलमैकञ्जमहाशयस्य अतिथिर्बभूव भारतस्य राजमहोदयः । क्षेत्रयोधने सह युद्धाभियानस्य साङ्गोपाङ्गं वार्तालापः अभवत् । क्षेत्रयोधः वार्तालापसमये राजमहोदयम् अपृच्छत् यत् भवतः देशस्य कति हीरकरत्नानि सह आनीतवान् भवान् ? अनेन प्रश्नेन राजमहोदयस्य दुःखम्, विस्मयेन सह निराशा च अभवत् । जीवन-मरणसङ्ग्रामे अपि संलग्नस्य राष्ट्रस्य सर्वोच्चसेनापतेः कियती लालसावृत्ता

मानसिकता आसीत् ।

रशियादेशेन सह भयङ्कर विस्फोटवर्षां साक्षाद् द्रष्टुम् अवसरं राजमहोदयः प्राप्तवान् । भीषणयुद्धात् सुरक्षिततया अवस्थानाय सः युद्धाभियानस्य स्थानात् परानीतः । युद्धे आहतानां सैनिकानाम् औषधालये साक्षात्कारं कृत्वा शोर्यं सान्त्वनां दातुं भारतीयसंस्कृतिसंवाहकः राजमहोदयः विस्मरेत् किमु ?

जर्मनशासकैः पश्चात् विमानयानेन समग्रयुद्धभूमेः आकाशनिरीक्षणं कारयित्वा जीवद्दृश्याणि दर्शितानि । राजमहोदयस्य जीवनस्य एषा प्रथमा विमानयात्रा आसीत् ।

भारतस्य एकस्य राज्ञः देशस्य स्वाधीनतायै सर्वस्वं समर्पयितुं भावनायाः कारणात् राजमहोदयः न केवलं हाथरसस्य राजा अपि तु समग्रस्य हिन्दुस्थानस्य प्रतिनिधिरूपेण स्वीकृतः अभवत्, सन्मानितः अभवत् । राजमहोदयस्य पुनर्जर्मनदेशम् आगन्तुं महत्त्वस्य सोपानाय समायोजनं सञ्जातम् ।

●●●

प्रकरणम् - ८

एतिहासिकं मेलनम्

भारतभूमेः स्वतन्त्रताप्राप्तये विदेशधरायां पादार्पणात् प्रागेव राजमहोदयः सर्वैः सह विचारविमर्शं कृत्वा कूटनीतिं निर्धारितवान् योजनायां लघुबृहतः अन्तरायाः आगताः तथाऽपि महदंशे राजमहोदयस्य यात्रया लाभः एव अभवत् ।

भारते आङ्गलशासनस्थापनानन्तरम् आङ्गलाः सामदानदण्डभेदानां शास्त्रैः सम्पूर्णभारतस्य नृपान् ब्रिटिश राज्यपक्षपातिनः तटस्थान् वा कर्तुं साफल्यं प्राप्तवन्तः ।

नृपाणां स्वीया अनन्या शक्तिः एवं जनसामान्येषु अनन्यं स्थानम् आसीत् । लघुगुरूणां सर्वेषां नृपाणां सामुहिकी उत्थापिता स्यात् तदा आङ्गलेभ्यः स्वप्रशासनं चालयितुं सुरक्षितुं वा सङ्कटम् उत्तिष्ठेत् तादृशं राजमहोदयस्य सुविचारितं मतम् आसीत् ।

राज्ञां मानसम्मानम् आङ्गलशासनद्वारा सुरक्षितं न भवति तस्मात् कारणात् सर्वाणि राज्यानि मनसा साम्राज्यं प्रति अननुरक्तानि आसन् । आङ्गलशासनसमानशक्तिधारिणः कस्यचित् देशस्य सङ्ग्रामे महतां राज्ञां सङ्गे खण्डराज्यानि अवश्यं संयुक्तानि भविष्यन्ति तादृशं राजमहेन्द्रप्रतापस्य अनुमानम् आसीत् ।

एतस्य अनुमानस्य आधारे राजमहोदयस्य इच्छा आसीत् यत् जर्मनशासककैसरद्वारा भारतस्य गणमान्यमहाजनेभ्यः पत्रं लिखितं स्यात् । एतस्मिन् विषये राजमहोदयः जर्मनदेशस्य अधिकारिभिः सह चर्चाविचारणाम् अकरोत् । विश्वयुद्धं प्रत्यक्षतो निभाल्य बर्लिननगरं प्रतिनिवृत्य इदं पात्रं सज्जम् अस्ति इति सूचना प्राप्ता । नेपालदेशस्य महाराजसहितेभ्यः राजमहोदयसूचितनामकेभ्यः राजभ्यः कैसरमहोदयस्य पत्रं प्रेषितम् अभूत् ।

एतस्मिन्नवसरे कैसरविलियम्सेन सह राजमहोदयस्य ऐतिहासिकं मेलनम् आयोजितम् अभूत् । जर्मनदेशस्य विदेशविभागस्य उपमन्त्री श्रीहरजेयरः राजमहोदयं कैसरस्य निवासस्थानम् अनयत् । विशालभवने कैसरः एकलः एव आसीत् । राजमहेन्द्रप्रतापः कैसरस्य चित्रं पूर्वं दृष्टवान् आसीत् अतः अभिज्ञाने विलम्बो न अभवत् । कैसरः स्वागतार्थम् अग्रे अगच्छत् । हिन्दुस्थानस्य मृत्तिकातः प्राप्तसंस्कारपरम्परानुसारं राजमहोदयस्य

हिन्दुस्थानपद्धत्या अभिवादनम् अकरोत् ।

भारतात् आङ्ग्लशासनं दूरीकर्तुं मुख्यत्वेन अभियानद्वयम् आसीत् । क्रान्तिकारिभिः सशस्त्रान्दोलनस्य गतिविधयश्चाल्यन्ते स्म । अपरत्र कॉङ्ग्रेससभायाः अग्रेसरतायां लोकान्दोलनं व्यापकम् अभवत् ।

भारते आङ्ग्लानाम् आधिपत्यं सुदृढं स्यात् तत् आङ्ग्लेभ्यः अनिवार्यम् आसीत् । भारतस्य विपुलमात्रायां धनधान्योत्पत्तिः स्वनिजपदार्थोत्पत्तिः अल्पार्धभृत्यवेतनता इत्यादिसदृशानि असंख्यकारणानि, तेन सह विश्वयुद्धे आङ्ग्लासैनापत्ये भारतीयसैन्यस्य शक्त्या आङ्ग्लसेनायाः शक्तौ अनेकगुणिता अभिवृद्धिः अभवत् ।

भारतस्य एवं भौगोलिकं महत्त्वम् आङ्ग्लानां ध्याने आसीत् एशियाखण्डे भारतस्य भूराजनैतिकमहत्त्वस्य कारणात् आङ्ग्लसाम्राज्ये अनेकविधदेशेषु सत्स्वपि भारतस्य महत्त्वम् आङ्ग्लाः जानन्ति स्म ।

अस्मिन् परिप्रेक्ष्ये भारतस्य स्वतन्त्रतायै राजमहोदयस्य कैसरस्य च मेलनं वैश्विकदृष्ट्या अत्यधिकं महत्त्वं धारयति स्म । उभयोर्महानुभावयोः मध्ये २० मिनिटपर्यन्तम् वार्तालापः अभवत् । राजमहोदयस्य ध्याने आगतं यत् महायुद्धस्य व्यस्ततायाम् अपि कैसरस्य पार्श्वे भारतस्य प्रचूरा सूक्ष्मा सूचना आसीत् । भारतस्य आन्तरिकीसूचनया सह राजमहोदयस्य विवाहः पञ्चनदस्य पुलकियाराज्ये अभवत् एतत्सहिता सूचना कैसरस्य पार्श्वे आसीत् ।

भारतस्य तत्समस्यैव सूचना आसीत् इति मान्यता क्षतिपूर्णा लेखिष्यते । भारते शताब्दिभ्यः यानि यानि आक्रमणानि अभवन् तानि अफघानिस्तानदेशसीमातः एव अभवन् तदपि कैसरः जानाति स्म ।

अत एव अफघानिस्तानदेशदिशातनः भारते आक्रमणं भौगोलिकदृष्ट्या आङ्ग्लशासनं समाप्तं कर्तुं सानुकूलं भविष्यति, तादृशः कैसरस्य स्पष्टः अभिप्रायः आसीत् ।

वार्तालापे अन्ते राजमहोदयः अकथयत् भारतस्य साधारणप्रजायाम् एवं धारणा

अस्ति यत् आङ्ग्लशासनं समाप्तं कर्तुं सानुकूलं भविष्यति, तादृशः कैसरस्य स्पष्टः अभिप्रायः आसीत् ।

वार्तालापे अन्ते राजमहोदयः अकथयत् "भारतस्य साधारणप्रजायाम् एवं धारणा अस्ति यत् आङ्ग्लशासनं शतं वर्षाणि भविष्यति । योगानुयोगम् आङ्ग्लशासस्य शतं वर्षाणि पूर्णानि भवितुं गच्छन्ति तस्मात् अधुना तस्य अन्तः करणीयः ।" आङ्ग्लशासनस्य अन्तानयनाय जर्मनशासनस्य पूर्णसहयोगस्य अपेक्षां राजमहोदयः अभिव्यक्तवान् ।

ऐतिहासिकमेलनानन्तरं प्रस्थानपरायणं राजमहोदयम् अवरुध्य कैसरः अकथयत् यत् अफघानदेशस्य अमीराय शुभकामनाः अवश्यं यच्छन्तु ।

अनेन मेलनेन राजमहोदयः अतीव प्रसन्नः अभवत् । कैसरस्य सहृदयता सरलता - मेलनानुसारिस्वभावद्वारा सः प्रभावितः अभवत् ।

आजीवनं भारतस्य स्वाधीनतायै प्रचण्डपुरुषार्थं कुर्वतः राजमहोदयस्य स्वतन्त्रभारते सम्मानं यद्यपि न जातम्, किन्तु जर्मनशासनं कैसरेण सह तस्य मेलनार्थं राजमहेन्द्रप्रतापाय अर्ड ओफ धी रेड इगल - इति पदेन सम्मानम् अयच्छत् ।

वैश्विकरङ्गमञ्चे एकस्य अभिनवस्य अभियानस्य महानायकः अभवत् अस्माकं राजमहोदयः ।

●●●

प्रकरणम् - ९

अफघानिस्तानीयमभियानम्

हिन्द-तुर्की-जर्मनाभियानस्य महानायकः अफघानिस्तानदेशं गच्छेत् एतादृशः कैसरेण सह वार्तालापे निर्णयः अभवत् । हिन्दुस्थानस्य स्वतन्त्रतायै निर्धारितायां योजनायाम् अफघानदेशस्य अमीरस्य सहानुभूतिः आवश्यकी आसीत् ।

आङ्गलानां सुदृढात् बन्धनात् अफघानिस्तानदेशः स्वतन्त्रः आसीत् तेन कारणेन तस्य विशिष्टं महत्त्वम् आसीत् । तुर्की - इरान - चीन - सदृशा देशाः, ये ईंग्लेन्डदेशस्य साम्राज्यवादिनीतिभ्यः रुष्टा आसन्, तैः सह अफघानिस्तान देशस्य सुमेलभरिताः सम्बन्धाः आसन् । भारतेन सह ऐतिहासिक - सांस्कृतिकसमानतया विशेषभावना अफघानिस्तादेशे दृश्यमाना आसीत् ।

एतस्मै अभियानाय राजमहोदयः सज्जताम् अकरोत् तस्योपरि निहितः विश्वासः साधारणः न आसीत् । विदेशमन्त्रिकार्यालये स्थित्वा सर्वविधां सूचनां सम्प्राप्य सः सज्जः भवन् आसीत् । अफघानिस्तानदेशं गन्तुं मार्गः अपि निश्चितः कृतः अभूत् ।

राजमहोदयः विदेशीयस्य आन्तरप्रवाहस्य अल्पकालिकदीर्घकालिकसमयभागस्य दृष्ट्या मूल्याङ्कनं करोति स्म । श्रीटण्डनः जर्मनदेशतुलनायां रशियादेशन सह भारतस्य मैत्रीं गाढां कर्तुं विषयम् अकथयत्, स राजमहोदयस्य मनसि आसीत् ।

विश्वयुद्धे द्वे शिबिरे आस्ताम् । भारतम् आङ्गलशासनात् स्वतन्त्रतां प्राप्तुं सङ्घर्षं कुर्वन् आसीत् । अल्पसमयभागे पराधीनभारतं वैश्विकप्रवाहस्य अधिकाधिकं लाभं गृहीत्वा स्वतन्त्रतां प्राप्तुम् आवश्यकसम्बन्धात् अन्यान्यदेशैः सह प्रस्थाप्य दृढान् कुर्यात् तादृशः राजमहेन्द्रप्रतापस्य अभिगमः आसीत् ।

दीर्घकालीनां मैत्रीं प्रस्थापयितुं भारतं शनैः शनैः रशियादेशेन सह सम्बन्धात् दृढायेत् तादृशं राजमहोदयः विचारयि स्म । अतः लघुदीर्घकालभागं दृष्टौ निधाय राजमहोदयः वर्तमानम् अभियानं हस्ते धृतवान् ।

विदेशविभागस्य मन्त्रीश्रीबेरबफग्नवेसदांफमहाशयेन सह व्यापकं परामर्शं विधाय

राजमहोदयः जर्मनरशियादेशयोः पारस्परिकसम्बन्धानां चर्चां कुर्वन् उभयोर्देशयोः मित्रतायै आग्रहम् अरक्षत् । श्रीबेरनः अस्मिन् विषये कामपि टिप्पणीं न अकरोत् ।

राजमहोदयस्य गहनाध्ययनस्य आधारेण हिन्दुस्थानस्य स्वातन्त्र्याय जर्मनरशियादेशयोरुभयोरपि मित्रता अनिवार्या आसीत् । परन्तु विश्वयुद्धकारणात् राजा महेन्द्रप्रतापः अस्म्न् विषये अधिकं किमपि कर्तुम् असमर्थः आसीत् ।

कैसरेण सह सफलमेलनात् अफघानिस्तानीयाभियाने जर्मनशासनस्य पूर्णसहयोगस्तथा भारतस्य स्वतन्त्रतायै जर्मनशासनस्य सुदृढभूमिका स्यात् तादृशी राजमहोदयस्य इच्छा आसीत् । एषा इच्छा तेन सम्बद्धेभ्यो जर्मनशासकेभ्यः अपि कथिता आसीत् ।

भारतस्य षड्विंशतिमहाराजेभ्यो लिखितानि पत्राणि अथ च अफघानिस्तादेशं प्रति प्रस्थानात् प्राक् राजमहोदयं प्रति सम्बोधयत् कैसरेण दत्तं पत्रं प्राप्तम् । पत्रे लिखितम् आसीत् "जर्मनाधिपतिना हिन्दुस्थानस्य स्वातन्त्र्यकर्म भवते दत्तम्"

राजमहोदयः एतदर्थं यत्किमपि करिष्यति तत्र जर्मनः शासनस्य सम्पूर्णसहायतां स प्राप्स्यति तथा च जर्मनशासनं हिन्दुस्थाने स्वाधिकारं न प्रस्थापयिष्यति, जर्मनशासनं हिन्दुस्थानेन सह व्यापारिकान् सम्बन्धान् स्थापयितुम् इच्छति ।

इत्थम् ईंग्लेन्डदेशविरुद्ध सशस्त्रमान्दोलनं खेलता जर्मनदेशेन राजमहोदयाय लिखितम् आश्वासनं दत्तम् सा महती उपलब्धिः इतिहासस्य पृष्ठेषु न उल्लिखिता एव ? कियती दुर्भाग्यवार्ता ?

राजमहोदयः पूर्णसज्जतया सह बर्लिनतः तुर्कीमार्गेण अफघानिस्तादेशं गन्तुं कुस्तुन्तुनियां प्रति प्रस्थितः कुस्तुन्तुनियानगरं तस्मिन् समये ओटोमनसाम्राज्यस्य राजधानी आसीत् । राजमहोदयस्य तत्र प्राप्य एव साम्राजा धर्मगुरुणा च भव्यं स्वागतं कृतम् । नैतिकी सहायता शस्त्रास्त्रसहायता दातुं प्रतिश्रुता ।

धर्मगुरुः अफघानदेशस्य अमीराय एकं परिचयपत्रमपि दत्तवान् । अस्मिन् पत्रे राजमहोदयाय सर्वविधां सहायतां दातुम् आग्रहम् अपि कृतवान् । राजमहोदयः अनवरपाशातलात्पाशा इत्यनयोरपि मेलनम् अकरोत्, ताभ्यां सह अनेकविधविषयेषु मन्त्रणाम्

अकरोत् ।

कुस्तुन्तुनियानगरात् राजमहोदयः बगदादानगरं गत्वा इरानदेशम् आगतवान्, तुर्कीतः इंसरानदेशस्य मार्गः अश्वैः अथवा अश्वशकटेन पारितः । तत्रत्योन्नताधित्यकाः प्राणसङ्कटेन सह पारिताः, राजा महेन्द्रप्रतापः स्वदलेन सह २ अक्तूबर १९१५ दिने अफघानिस्तानदेशस्य राजधानीं काबूलनगरीं प्राप्तः । अफघानदेशस्य अमीरेण तस्य ऊष्मभूतं स्वागतं कृतम् ।

राजमहोदयः सार्धद्विवर्षम् अफघानिस्तानदेशे न्यवसत् । अयं समग्रः समयः तत्समयस्य गतिविधिभिः, राजमहोदयस्य कूटनीतेः सफलता इत्यादिसहिताः सर्वविषयाः भारतस्वतन्त्रतायाः प्राप्तौ मूलाधाराः सिद्धा अभवन् ।

●●●

पीमितः शास्त्रभाण्डागारः, अल्पकालिकं प्रशिक्षणम्, विराडाङ्ग्लसेना इति कारणात् युद्धस्य परिणामः धारणानुसारम् एव आगतः ।

आङ्ग्लसेवया समरे बहुशः स्वतन्त्रभारतसर्वकारस्य सैनिकाः गोलिकाभिरभिविद्धाः । कतिपयान् गृहीत्वा गलोद्बन्धनेन हतवन्तः एव कतिपथे घोरजङ्गलेषु मरणशरणङ्गताः । पुनः १९१९ अफघानयुद्धदिवसेषु अपि हिन्दुस्थानस्य उपरि आक्रमणस्य द्वितीयः प्रयत्नः अभवत् ।

आक्रमणे लब्धया असफलतया राजमहोदयः हताशकः न अभवत् । परजयादनन्तरं रणनीतियोजना अवशिष्टा आसीत् । समयस्य सदुपयोगकरणशीलता राजमहेन्द्रप्रतापस्य शैशवात् आसीत् । स्वतन्त्रभारतसर्वकारस्य सैनिकानां हिन्दुस्थाने आक्रमणे पराभवं प्राप्य राजमहोदयः पामीरक्षेत्रस्य गहनं प्रवासं विधातुं समयमयापयत् ।

राजमहोदयः प्रेम-धर्म-सर्वधर्मैकता द्वारा विश्वशान्तिनिर्माणस्य स्वप्नम् असेवत् । राजमहोदयस्य मतम् आसीत् यत् विभिन्नधर्माणां निकटतः अभ्यासेन अयं स्वप्नः सकारः भविष्यति ।

इस्लामस्य गहनाभ्यासाय राजमहोदयः पामरक्षेत्रस्य विस्तृतं प्रवासमायोजयत् । अस्मिन् प्रवासे इस्लामीयसाहित्यम्, सङ्घरचना, सङ्घसभ्यानां कार्यशैली एव एतेषां सर्वेषाम् इस्लामस्य अनुयायिषु प्रभावविषये राजमहोदयः साङ्गोपाङ्गं सूचनां प्राप्तवान् ।

राजमहोदयः स्वस्य अध्ययनस्य अनन्तरं सारं निष्कासितवान् यत् इस्लामसाहित्ये अथवा तत्परम्परायां तादृशी वार्ता न आसीत् या तस्य अनुयायिनः अन्यमतावलम्बिभिः सह प्रेम कर्तुम् अवरुन्ध्यात् ।

एकः राजपरिवारयुवकः प्रेमविद्यालयसंस्थापकः भारतीयस्वतन्त्रतायै सशस्त्रयुद्धाय वैश्विकजनमतपोषकः तथा स्वतन्त्रभारतसर्वकारस्य संस्थापकः राष्ट्रपतिः राजा महेन्द्रप्रतापः अफघानिस्तानस्य निष्फलतायां सत्यामपि पुनः वैश्वजनिककूटनीतिविषये हिन्दुस्थानस्य स्वतन्त्रतायै विश्वमतसज्जातायोजनां हस्ते धृतवान् ।

●●●

प्रकरणम् - ११

विश्वसङ्घस्य स्थापना

१९१८ शताब्धारम्भे भूस्वामिवादविरुद्धं रशियादेशीयकृषकद्वारा वाहीकैश्च क्रान्तिविषयकसमाचारान् निशम्यैव राजमहोदयस्य रशियागमनेच्छा अधिकतरं प्रबला संवृत्ता । १९१९ मार्चमासे रशियादेशं प्रति प्रस्थितवान् ।

काबुलात् पेट्रोगेड्नगरं सम्प्राप्तः ।

सोवियेट्क्रान्तेः सूत्रपातकारणाद् एतद् नगरं नवीनसर्वकारेण राधानित्वेन घोषितमासीत् । भाविनः विश्वस्य विचारधारायां यस्याः प्रभावः कल्पितः आसीत् तस्या उद्गमस्थलसम्पर्कात् राजमहोदयः नूत्नाम् अनुभूतिं प्राप्तवान् ।

सः १४ मार्चदिनाङ्के पेट्रोग्रेडनगरं सम्प्राप्तः । १५ मार्चदिने सोवियेट् क्रान्तिनायकेन लालसेना-प्रमुखसेनापतिना ट्राटस्कीनामकेन च समागमं कृतवान् । श्रीमान् ट्राटस्की राजमहोदयस्य आत्मीयतापूर्वकं स्वागतं कृत्वा तस्मै जर्मनीं गन्तुं देशान्तरानुमतिपत्रमपि दत्तवान् ।

रशियानिवासकालान्तराले राजमहोदयः विचारधारायाः सोवियेटसङ्घटनस्य च गहनत्वेन अध्ययनं कृतवान् । अभ्यासं कुर्वाणः सः सततं विचारयति स्म यत् यथा भूस्वामित्ववादः उत्खात्य क्षिप्तश्च तथा भारतीयप्रजासु दासत्वम् निर्मूलयितुं कदा क्रान्तिः उद्भवेत् ? रशियादेशेन सह अधिकं गाढमित्रता स्यात् तथा च भारतीयस्वतन्त्रतार्थं तस्मात् अधिकं साहाय्यं प्राप्येत इति राजमहोदय इच्छति स्म ।

रशियातः जर्मनीदेशं गत्वा पुनः कैसरेण सह संवादं कृत्वा राजमहोदयः कुस्तुनित्यां च प्राप्यः पुनः खलीफां मिलितवान् । अफघान-अमीरद्वारा खलीफाप्रदत्तं पत्रं सुप्रापितवान् ।

भारतवर्षस्य स्तन्त्रतार्थं सहायं प्राप्तुम् अन्यदेशभ्रमणात्मकः एकः उपक्रमः समाप्तः । राजमहोदयेन अनुभवपाथेयं प्राप्तमासीत् । विचारशीलव्यक्तित्वानि अनुभवानुसारम् अग्रिमयोजनाः प्रकल्पयन्ति ।

राजमहाशयः अन्ततो गत्वा इत्थं निष्कर्षं कृतवान् यत् ईंग्लेण्ड-जर्मनीसदृशानां साम्राज्यवादिनां देशानां दृष्टिकोणः भारत-चीन -सहितं पूर्वदेशात् प्रति समातन एव । एते साम्राज्यवादिनः देशाः स्वदेशहितार्थं स्वीयाः सीमाः एशिया-आफ्रिकाखण्डपर्यन्तं विस्तारयितुमिच्छन्ति । अस्याः इच्छायाः परिपूर्त्यर्थं साम्राज्यवादिनः शक्तिमन्तो देशाः सिद्धान्तरहितमेव ग्रन्थिबन्धनार्थं मैत्री-साधनार्थं वा सज्जाः भवन्ति ।

राजमहोदयः अनुभूतवान् यत् कार्लमार्क्स बोलशेवी इत्यनयोः विचारधारायाः व्यापः वर्धमानः अस्ति इति । सः एतयोः विचारधारायाः गहनमध्ययनं न कृतवान् । यस्य रोमरोमसु सम्पूर्णमानवजातेः सुखशान्त्योः समृद्धेश्च विचारः आसीत्, तादृशः राजमहोदयः एतद् विचारद्वयं स्वकल्पनानुसारं वैश्विकरचनानुकूलं स्यान्नवेति निश्चेतुं नाशक्नोत् ।

सः सोवियेट्-विचारधारां ज्ञातुं प्रयतमानः असीत् । वैश्विकदृष्ट्या अस्या विचारधारायाः अनुकूल्यं तथा भारतस्य दासत्वमुक्त्यर्थम् अर्जनीयं साहाय्यम्; ईति द्विवीधदृष्ट्या राजा महेन्द्रतापः अस्याः विचारधारायाः यथाधिकं परीक्षणार्थम् इच्छुकः आसीत् । राजमहोदयः विश्वदृश्यं दृष्टिसमक्षं कल्पयन् सर्वेषां देशानाम् आन्तरिक-राजकीयपरिस्थितिं पारस्परिकेर्ष्यां द्वेषम्, आघातं प्रत्याघातान् च सूक्ष्मतया अभ्यस्तवान् । अभ्यासानन्तरं सः स्पष्टतया मन्यते स्म यत्; परस्परं सद्भावनां विना स्नेहपूर्णः आत्मीयतासम्बन्धः असम्भवः इति । स्नेहपूर्णस्य आत्मीयतासम्बन्धस्य अभावे विश्वस्मिन् अस्मिन् सुखशान्ती आनेतुम् अशक्ये ।

भावनामिमां द्रढयितुं रामजहोदयः विश्वव्यापिसङ्घट्टनमारब्धुं निश्चयं कृतवान् । भारतस्वाधीनतार्थं जीवनं समर्प्य क्रान्तिकारिमार्गपथिक इव राजा महेन्द्रप्रतापः प्रेम-धर्मयोः पूजार्थी अभवत् तथा च १९१९ तमवर्षे हङ्गेरीराजधान्यां बुडापेस्टमध्ये विश्वप्रेम्णः सर्वधर्मैकताकेन्द्रस्य च प्रतिष्ठां कृतवान् ।

•••

प्रकरणम् - १२

लक्ष्यपर्यन्तम् अप्राप्य.....

ध्येयनिष्ठा व्यक्तिः जीवनलक्ष्यप्राप्तिं विना निरान्तपूर्वकं न निषीदति । बुडापेस्टकेन्द्रे राजा नाधिकानि दिनानि यावत् स्थातुं शक्तः ।

राजा बुडापेस्टतः विश्वयुद्धानन्तरीयास्थितं विलोकयन् स्वीटझरलेण्डं प्राप्तः । तत्र प्राप्ते सति अनुपदमेव सः अफघानिस्तानसत्तापरिवर्तनसमाचारं श्रुतवान् । अमीरस्य हत्या जाता, ततश्च तस्य तृतीयः पुत्रः अमानुल्लाखां नामकः सिंहासनमारोहितः अभूत् । राजा महेन्द्रप्रतापः प्रायः सार्धद्विवर्षाणि यावत् अफघानिस्ताने न्यूषितवान् । एतत्कालान्तराले सः तत्रत्य अमीरेण सर्वकारीयमुख्याधिकारीवर्गेण च निकटतया परिचयं स्थापितवान् । युवराजेन अमानुल्लाखानेन सह तु घनिष्ठमित्रतामुद्भावितवान् आसीत् । १९१८ तमवर्षे युवराजः अमानुल्लाखां महेन्द्रप्रतापाय स्वीयं छायाचित्रं प्रदत्तवान् । एतस्मिन् छायाचित्रे पार्शियन् भाषया लिखितमासीद् यत्; "अस्मत्सख्यस्मृतौ छायाचित्रमिदं सम्माननीयाया मथुरा हाथरसे राजाय महेन्द्रप्रतापाय उपायनीकरोमि"।

युवराजे अमीरे जाते ईंग्लेण्डदेशेन च अफघानिस्तानेन सह युद्धे घोषिते राजमहोदयः भारतस्वातन्त्र्यार्थं स्वयोजनापूर्त्यर्थं च सुवर्णावसरं कल्पितवान् ।

रशियागमनपूर्वकं सः अफघानिस्तानं प्रस्थितः । मोस्कोमध्ये लेनिन-महोदयेन सह संवादः संवृत्तः । एशियाखण्डीयदेशविषये स्वतन्त्रतान्दोलनविषये च विगतानुसारं चर्चा सञ्जाता । विश्वसङ्घस्थापनाविषयेऽपि विचाराणाम् आदानप्रदानं संवृत्तम् । लेनिन वार्तालापसमये व्यज्ञापयद् यत्; राजमहोदयस्य या धर्म-धैर्यविषयाणी कल्पना, सा टोल्सटोय-कल्पनानुसारिणी एवास्ति ।

मोस्को-निवासभ्यान्तराले महेन्द्रप्रतापः सोवियेटसर्कारस्य अतिथित्वेन आसीत् तथा च सर्वकारातिथिगृहे निवासं प्राप्तवान् । राजमहोदयस्य पूर्वसहयोगिद्वयं मौलाना बरकतउल्ला तथा च तातारप्रदेशस्थः विद्वान मौलाना यूसा जाल्लरूह इति तत्रैव स्थितमासीत्; कालक्रमात् च तत् सोवियेट विरोधि जातम् । सोवियेट सर्वकारीयविदेशमन्त्रालयाधिकारिभिः

पहापि राजमहाशयस्य चर्चा सम्पन्ना । तत्र सः सुक्रेमैनाफुमहोदयं ब्रिटीशि-साम्राज्यम् उन्मूल्य क्षेप्तुं भारतस्वातन्त्र्य-योजनायाश्च विषये विज्ञापितवान् । राजमहोदयस्य लक्ष्यविषये पहानुभूतिं व्यञ्जन् श्री एम. सुक्रेमैनाफ् महोदयः उक्तवान् यत् - सोवियेट् रूस स्वयम् ईंग्लेण्डसाम्राज्यसत्तां सर्वस्थानेभ्यः नष्टां करिष्यति ।

रशियातः अफघानिस्तानपर्यन्तं प्राप्तुं कलाविधिधारणापेक्षया अधिकं व्यायतः । मध्यमार्गे सोवियेट्क्रान्तिसमर्थकाणां विरोधिनाञ्च मध्ये भीषण : सङ्घर्षः प्राचलत् । १९१९तमवर्षस्य १२ दिसम्बर दिनाङ्के राजमहोदयः काबूलं प्राप्तः । अफघानयुद्धं समाप्तमासीत् तथा इंग्लेण्ड अफघानिस्तानस्य स्वतन्त्रसार्वभौमसत्तां स्वीकृतवान् ।

नवाभिषिक्तेन अमीरेण सह महेन्द्रप्रतापस्य घनिष्ठमित्रता आसीत् । हार्दोष्मणा स्वागतानन्तरम् आमीर - अमानुल्ला खां महेन्द्रप्रतापं चीन-तीबेट-जापानदिपूर्वीयदेशेषु अफघानिस्तानस्य प्रावीण्यपूर्णनेतृत्वाभियाने गन्तुम् आग्रहं कृतवान् । इदं दायित्वं राजमहोदयेन सहर्षं स्वीकृतम् । तेन सह सेनाध्यक्षः अब्दुलकरीमखां बरसाकमहोदयः प्रेषणीयः इति निर्णीतम् ।

काशीदुर्गपर्यन्तम् अस्याभियानस्य दलं सम्प्राप्तम् एवञ्च आङ्गलराजदूतः प्रच्छन्नतया राजमहोदयम् अन्वधावत् । अफघानिस्तानम् ईंग्लेण्डविरुद्धं युद्धस्य घोषणामकरोत्, तत्पृष्ठभूमौ राजमहोदयः अस्तीति आक्षेपः आपतितः । सीमारक्षकाः चीनदेशीयाधिकारिणः आङ्गलेभ्यो बिभ्यति स्म, अतः तेषाम् अधिकारिणां कृते आमीरलिखितं राष्ट्रपतिनाम्ना पत्रं प्रदाय राजमहाशयः १९२०तमवर्षे काबूलं प्रतिनिवृत्तः ।

पुनरपि अफघानाधीशस्य आग्रहेण पामीरक्षेत्र-सीमानन्तरीयदेशानां सम्मेलनाभियानार्थं महेन्द्रप्रतापः अब्दुकरीमखां च निष्क्रान्तौ अश्वारूढयोः कृतः अयं प्रवासः अतीव दुष्करः आसीत् । चीनसीमानं प्राप्तस्य दलस्य आंङ्गलाधिकारिणः पृष्ठानुसरणं कृतवन्तः । राजमहोदयं जीवितं मृतं वा प्रगटीतुम् एकं सम्पूर्णपदातिदलं नियुक्तम् आसीत् ।

आन्तरराष्ट्रीयाधिनियमानां लेशमात्रमपि चिन्ताम् अकृत्वैव आङ्गलपदातियूथं चीनसीमानं प्रविश्य दूरतरं सम्प्राप्तम् । चीनाधिकारिभिः इदं वृत्तं राजमहोदयाय

विज्ञापितम् । सावधानः राजमहोदयः स्वात्मानं सङ्कटग्रस्तम् अन्वभवत् ।

सहसैव राजमहोदयः आङ्ग्लसैनिकयूथस्य हस्तगतः भविष्यन्नेव आसीत् । किन्तु तत्कालान्तराले एकं रशियासैनिकयूथं पामीरं प्राप्य ताश्कन्दं प्रति गतम् आसीत् । राजमहोदयः तद्यूथसमीपं सम्प्राप्तः आत्मनः मुद्रीमपि कठिनां सङ्कटयुक्तां स्थितिं च विज्ञापितवान् । आङ्ग्लसैनिकयूथहस्तात् लक्ष्यम् आकुञ्चितमिव अभवत् ।

सङ्कटमुत्तीर्य राजमहोदयः स्वीयेन यूथेन सह अश्वारूढः सन् रशियारेलद्वारा ओशस्थानकं सम्प्राप्तः ततः सः पामीरपूर्वकं काबूलं प्रत्यागन्तुमिच्छुकः आसीत् ।

पामीरं प्राप्ते सत्येव राजमहोदयः संज्ञातवान् यत्; तेन समारब्धमभियानं सेनाध्यक्षः वली खां सफलतया पूर्णमकरोत् । अतः अधुना अभियानार्थम् अफघानिस्तानगमनं व्यर्थं विचार्य राजा तस्मादेव स्थानात् यूरोपखण्डाय प्रस्थितः ।

●●●

प्रकरणम् - १३

विश्वप्रेम्णः महापूजकः

अफघानिस्तानात् यूरोपगमनानन्तरं राजमहाशयः हङ्गेरीबुडापेस्टस्थिते स्वकीये विश्वप्रेमधार्मिकताकेन्द्रे निवासं कृतवान् । १९२२ तमवर्षे राजा स्विट्झरलेण्डदेशं सम्प्राप्तः । सेनाध्यक्षवलीखांवर्येण सह तत्र रोम-इटलीदेशं गतवान् । रोमतः हङ्गेरीं प्रत्यागतः । पुनरेकस्मिन् प्रामुख्यपूर्णाभियानकार्ये संयुक्तः ।

ततः सः बुडापेस्टतः मोस्को आगतः सोवियेट्क्रान्तेः वार्षिकोत्सवे सहभागी भूत्वा कतिपयदिनानि एकान्ते यापितवान् । १९२३तम वर्षारम्भे जापाने निवासकालस्य न्यूनतायां सत्याम् अनेकाभिः व्यक्तिभिः घनिष्टमित्रतां स्थापयितुं सफलतां प्राप्तवान् । तेषु मित्रेषु काउन्टीसफाई अन्यतमः आसीत् । स एकः अभिजनः राजनीतिज्ञः व्यापारी आसीत् । राजा तं विश्वसङ्घकोषपालत्वेन नियुक्तवान् तथा च समस्तं स्वीयं गुप्तम् अभिलेखादिकं रिक्थधनादिकं कोषे न्यस्तवान् ।

१९२३ तमवर्षे राजा यात्रां कुर्वाणः चीनदेशं सम्प्राप्तः । चीनयात्रां समाप्य पुनः १९२३ तमवर्षान्ते मोस्को आगत्य सोवियेटक्रान्तेः वार्षिकोत्सवे उपस्थाय सः अफघानिस्तानं प्रतिनिवृत्तः । राजा तत्र अफघानसर्वकारातिथित्वेन उषित्वा अनेककार्येषु सर्वकारसहायतां कृतवान् । अफघानाधीशः सम्मानत्वेन तस्मै दशसहस्रं मुद्राः उपायनीकृतवान् ।

चराति चरतो भगः इत्युक्ते : जीवदुदाहरणं राजा महेन्द्रप्रतापः आसीत् ।

१९२५ तमवर्षे राजा पुनरपि यूरोपयात्रार्थं निष्कान्तः । विश्वप्रेम प्रसारयितुं तत्र गत्वा तत्कार्यमारब्धवान् । १९२६ तमवर्षे राजा स्विट्झरलेण्डमध्ये पं.जवाहरलालनहेरूमहोदयसम्पर्कं लब्धवान् । अयं सम्पर्कः कियान् रोचकः इति पं.जवाहरस्य मेरी कहानी इति पुस्तकस्थया राजमहोदयविषयकटिप्पण्या कल्पयितुं शक्यते ।

स्विट्झरलेण्डतः मौलाना बरकतउल्लावर्येण सह राजा प्रथमवारम् अमेरिकां गतः । सम्पूर्णेन अमेरिकाप्रवासे विश्वप्रेम-सर्वधर्मैक्यसाधकस्य विश्वसङ्घस्य रचनासम्बन्धिनः स्वविचारान् प्रचारितवान् । सानफ्रान्सिसको इत्यस्य एशीयाखण्डीय समीक्षा इत्यत्र

राजमहोदयविषयकः लेखः प्रकाशितः ।

सतीर्थ्यस्य मौलाना बरकतउल्लावर्यस्य सानफ्रान्सिस्कोमध्ये देहान्ते जाते राजमहोदयः गम्भीरम् आघातमनुभूतवान् । अमेरिका-प्रवासाभ्यन्तराले अभियानार्थं सङ्घार्थं च राजमहाशयः अष्टसहस्रम अमेरिकीयमुद्राः अर्जितुं शक्तवान् । १९३४ तमवर्षे राजा द्वितीयवारमपि तत्र प्रोषितवान् ।

अमेरिकास्थैः कैश्चित् शीखमित्रैः सह राजमहोदयः १९२७ तमवर्षारम्भे शाङ्घईमहानगरं प्राप्तवान् । इतः तिबेटपूर्वकं हिन्दुस्थानं गन्तुं स विचारितवान् । ततः प्राक्तनप्रवासाावसरे आङ्गलजनकारणात् तस्य प्रयासः सफलः नैव संवृत्तः, किन्तु एषमः तिबेटगमनं सफलतादायकं संवृत्तम् । दलाईलामा तस्य हार्दिकं स्वागतं कृतवान् । तिबेटतः हिन्दुस्थानगमनस्य असम्भवत्वात् सः पुनः चीनदेशमागतः ।

नवोदयं प्राप्तवत् चीनप्रजातन्त्रस्य राजधानी नानकीङ्ग आसीत् । प्रजातन्त्राधिकारिभिः राजमहोदयस्य स्वागतं व्यह्रय विश्वसङ्घकेन्द्रस्थापनार्थं सहायतापि सम्पादिता । राजमहाशयः हैङ्को, वाईफेङ्ग प्रभृतिषु नैकस्थानेषु प्रवचनानि प्रस्तूय एकस्याः शक्तिसेनायाः स्थापनां कृतवान् यत्र हिन्दुस्थानीयाः चीनीयाश्च समाविष्टाः ।

मार्शल लेङ्ग-यु-श्याङ्गवर्यस्य आमन्त्रणं स्वीकृत्य एकं विशालं सम्मेलनं राजमहोदयः सम्बोधितवान् । नानकिंग प्रतिनिवृत्तः राजातिथिरूपेण च उषितवान् । राजा तत्र ईस्टर्न अपैस्ड पीपल्स एसोसीयेशन कार्येषु महत्त्वपूर्णां भूमिकां भजित्वा कांश्चन लेखानपि प्रकाशितवान् ।

१९२८ तमवर्षे फरवरीमासे उवाङ्गलगुप्तचराः तथा चीनीयगृहयुद्धात् आत्मानं संरक्ष्य राजवर्यः नानकिंगतः जापानदेशं प्राप्तः । तत्र राजमहोदयस्य भव्यस्वागतार्थं जापानीयसंसत्सभ्यः श्रीनाकातानी अपि आसीत् । जापान्देशस्य सम्पूर्णप्रवासे सः महेन्द्रप्रतापेन सहैव सङ्गतः । सः राजमहोदयस्य भाषणानि जापानभाषया अनूदितवान् ।

राजमहोदयस्य ख्यातिः तावत् व्याप्ता आसीद् यद् निपन दैनिकं १९२८ तमवर्षस्य १८ फरवरि दिनाङ्के तत्सम्मानार्थम् एकं विशेषाङ्कं प्रकाशितवात् । १३ अप्रैल दिवसीये "ओसाकधा"इति वृत्तपत्रेऽपि मुखपृष्ठे राजवर्यस्य छायाचित्रं प्रकाशितम् । सः १३ अप्रैल

दिने पुनः चीनदेशं प्रस्थितवान् ।

१९२८ तमवर्षे १५ जूनदिनाद् आरभ्य ईस्टर्न ओप्रैस्ड पीपल्स एसोसियेशन् पक्षतः राजमहाशयः नान्काग-नगरात् एकस्य आङ्ग्लपाक्षिकवृत्तपत्रस्य प्रकाशनमारब्धवान् । यदा सः पेकिंग गतः तदा वृत्तान्तं प्राप्नतवान् यत् अफघानिस्तानस्य अमीरः अमानुल्लान स्वदेशं परित्यज्य यूरोपं गत इति । आमीरं जापानदेशमानेतुं व्यवस्थां राजमहोदयः सम्पादितवान् । किन्तु अमीरस्य कश्चित् प्रतिभावः न सम्प्राप्तः । अतः अफघानिस्तानं गन्तुं विचार्य राजा चीनतः जापानान्तरं मोस्कोमहानगरं प्राप्तवान् ।

ताश्कन्दात् काबूलं गन्तुम् उत्सुकः राजवर्यः ताश्कन्दार्थं पोतान्तरणपत्रप्रापण कष्टानुभवं कृतवान् । ताश्कन्दगमनानुमतौ प्राप्तायां तत्र गत्वा अफघानिस्तानविषये अशान्तेः विद्रोहस्य च वृत्तं श्रुतवान् । राजमहोदयस्य पार्श्वे धनस्यापि न्यूनता जाता । स्वकीयसार्थवस्तूनि विक्रीय वित्तवस्तुविवेकेन जीवितुम् अभ्यासः आपतितः ।

अफघानिस्तागमनस्य दुष्करत्वात् सः ईरानं गन्तुं प्रस्थितः । ईरानमध्ये अनेकेषु नगरेषु विविधाग्रणीजनैः सह सम्पर्कं विधाय भाषणसम्मेलनादिकार्यक्रमद्वारा सः स्वविचारान् अभिव्यज्य भारतीयस्वाधीनतार्थं सहकारं प्राप्तवान् ।

१९२९ तमवर्षस्य जुलैमासे पहलवी, बाकुव्यतीत्य राजा महेन्द्रप्रतापः मोस्को सम्प्राप्तः । तत्राधिकं निवासमकृत्यैव सः चीनं प्रस्थितः । राजमहोदयस्य कृते इयम् अन्तिमा रशियायात्रा संवृत्ता । ततः परं स्टालीनसर्वकारः तस्मै रशियागमनार्थम् अनुमतिं न दत्तवान् ।

पश्चिम पूर्वोत्तरसहितं विश्वभ्रमणकर्ता भारतीयक्रान्तेः पूजकः विश्वशान्तेश्चापि पूजकः राजा महेन्द्रप्रतापः एकस्यै अन्यतमायै विश्वरचनायै जगद्विख्यातः भवति स्म ।

•••

प्रकरणम् - १४

वैश्विकं दृश्यम्

समाजजीवने सक्रियरूपेण कार्यं कुर्वतीभिः व्यक्तिभिः आसमन्तात् सामाजिकार्थिक-राजकीयादिषु अन्यान्यविषयाणां तलस्पर्शि-निरीक्षणं कर्तव्यं भवति। निरीक्षणाधारेणैव परिस्थितिमूल्याङ्कनानुसारम् अग्रिमकार्यजातस्य दिशा योजना गतिश्च निर्धार्यन्ते।

राजमहोदयः वैश्विकपरिस्थितिविषये चिन्तावान् आसीत्। स्वानुभवजन्यज्ञानाधारेण स्थितिनिराकरणार्थं सः एकमेवमुपायं दृष्टवान्। आमेरिकाप्रवासाभ्यन्तरे 'एशियाटिक रिव्यु' इत्यस्य लेखे राजमहोदयः विषयमेतं विवृण्वन् लिखितवान् "अथाहं भिक्षुकः इव प्रेमगीतां गायन् सर्वत्र अटन्नस्मि मामकं मतमिदं यत् सम्पूर्णविश्वम् एकं बृहत्कुटुम्बकमस्ति, एवञ्च सर्वे देशाः तस्य अङ्गोपाङ्गानि सन्ति। ननु तथापि सर्वे देशाः एकीभूय एकं विशालं संयुक्तकुटुम्बं कल्पयेयुः इति न सम्भवम्? किं वयं प्रेम आत्मसात् कृत्वा शान्तेः आवाहनं कर्तुं न शक्नुयाम। अनेकेषां राजनेतॄणां सम्पर्कं कुर्वाणो भ्रमामि तदानीं ते मा स्वप्नतरङ्गविहारी इति व्यपदिशन्ति किन्तु देशविदेशयात्रां कुर्वाणोऽहं यदा कोट्यवधिजनानां नयनानि आशापूर्णदृष्ट्या विलोकयामि तदानीं तान् इत्थं भाषमाणान् अनुभवामि यत् अयि महेन्द्रप्रताप! भवदीयः मार्गः सर्वथा न्याय्यः" इति।

सर्वेऽपि जनाः जन्मकालिकनामसु सर्वधर्मैक्यं पश्यन्ति। एकत्वमार्गे कश्चिदवरोधो मा भूत्, तदर्थं राजवर्यः स्वीयं नाम इत्थं परिवर्तितवान्.... पीटर-पीट्-प्रताप... इति।

१९३४ तमवर्षारम्भे राजवर्यः स्याम् इति स्थानके यस्येदं नाम युद्धसमये जापानीयाः थाईलेण्ड इति ख्यातवन्तः। जापानं विहाय सुदूरपूर्वीयदेशेषु थाईलेण्ड स्वतन्त्रः स्वाधीनश्च देश आसीत्। तत्र हिन्दुस्थानीयानां बृहती सङ्ख्या प्रतिवसति स्म। राजवर्यस्य आगमनसन्देशं प्राप्य तत्रस्थाः हिन्दुस्थानीयाः तस्य स्वागतार्थम् ओजस्विसज्जताम् आरब्धवन्तः। ब्रिटीशदूतावास एतत् श्रुत्वा अप्रसन्नतां व्यक्तवान्।

लोकजागृतेः अभावात् हिन्दुस्थानीयसमाजे सङ्घटनशक्तिः नासीत्; न केवलमिदं

प्रत्युत थाईसर्वकारः अपि आङ्गलदूतावास प्रभावाधःस्थः आसीत् । आङ्गलदूतावासस्य थाईसर्वकारस्य च निषेधे सत्यपि राजवर्यः बेङ्गकोकपोतायतनं जापानीयपोतवाहनद्वारा सम्प्राप्तः । तदानीं गोरखपुरीय श्रीरामधनशाहवर्यस्य अध्यक्षतायाम् अनेके हिन्दुस्थानीयाः तस्य स्वागतार्थं सज्जीभूताः ।

आङ्गलदूतावासस्य सर-जोसिच्-कामले-नाम्ना अधिकारिणा थाईसर्वकारः प्रसभं राजमहोदयस्य बेङ्गकोकनगरात् निर्वासनार्थम् आदिष्टः । जापान्-देशं गन्तुं मासद्वयं यावत् पोतवाहाभावात् परवशीभूय थाईसर्वकारः राजवर्यनिवासार्थम् अनुमतिं दातुं विवशो जातः । राजमहोदयः केन्द्रियसुरक्षास्थानके निवासितः । कारावासाभ्यन्तराले किञ्चित् कष्टदायकं न संवृत्तम् । तस्य समस्तसुखसुविधासु तथापि हिन्दुस्थानीयजनसम्पर्के वार्तालापे वा कश्चिद् अवरोधो नासीत् ।

जापाने प्रतिनिवर्तनानन्तरं विश्वशान्तेः विश्वप्रेम्णश्च सन्देशस्य प्रसारार्थं राजमहोदयः स्वीयं केन्द्रं स्थापितवान् । भारतीयव्यापारोद्योगविषये शासनसम्बन्धिकार्यविषये च हिनदुस्थानीयजनसम्पर्कः विचारविनिमयादिकं च नियतरूपेण सम्भूतम् ।

एशियाखण्डीयजनानां जापानदेशे पाश्चात्यषडयन्त्रात् मोचनोद्देशेन समायोज्यमानासु सभासमारोहेषु सक्रियत्वेन भागग्रहणं राजमहोदयस्य मुख्या प्रवृत्तिः आसीत् । जापान-एशियाटिक्-आन्दोलनद्वारा १९३९ तमवर्षे ब्रिटिश-साम्राज्यवाद विरोधार्थम् आयोजितायां सभायां राजा महेन्द्रप्रतापः मुख्यातिथिः आसीत् ।

दशसहस्रजनसङ्ख्यान्वितां सभामिमां सम्बोधयन् राजमहोदय उक्तवान् ; मया अनुभूतं यत् रशियादेशे प्रवृत्तायाः सोवियेट्क्रान्तेः स्वरूपं ब्रिटीशविरोधि आसीत् । परन्तु अनेन देशद्वयेन स्वस्वमतभेदनिराकरणपूर्वकं तथा हार्दिकमेलनेन कार्यं कृतवत् यथा तस्य स्वार्थः समानतरः स्यात् ।

जापानीयप्रजाः सचिताः कृत्वा आह्वानमिवघोषयन् राजमहोदयः प्रोक्तवान् यत् - "आङ्गलीयकूटनीतिविषये जापानीयैः सजागृहतिभिः पूर्णसावधानता रक्षणीया इति आवश्यकतमम् । जापान-सर्वकार आङ्गलीयानां प्रतिहारमात्रम् मा भूत् इति विषये जागरूकता आवश्यकी । एशीया, एशियाजनानां कृते इति या भावना जापान-मध्ये उज्जागरितास्ति

तरया अहं स्वागतं व्याहरामि ।"

सभासम्बोधनोपसंहारावसरे राजवर्यः व्यवहृतवान्; "यदि एशियाखण्डे पूर्णतया शान्तिसन्तोष-स्वतन्त्रताः यदि सार्थकीभवेयुः तर्हि सम्पूर्ण विश्वम् योग्य-मार्ग-प्रापणे यदि सार्थकीभवेयुः तर्हि सम्पूर्ण विश्वेन योग्य-मार्ग-प्रापणे न विलम्ब्येत । इत्येतत् स्पष्टीभवेत् यत् अस्माकं ध्येयं विश्वसमस्तस्थितमानवानां सुख-शान्ति-सन्तोषार्थं स्वतन्त्रताप्राप्त्यर्थं चास्ति" इति ।

द्वितीयविश्वयुद्धे प्रारब्धे एव १९३९ तम वर्षस्य सितम्बर-मासे राजमहाशयः रशियायात्रार्थं प्रयतवान् । १९१४तमवर्षे प्रथमविश्वयुद्धावसरे रशिया-जर्मनीदेशयोः मैत्री विषयकं स्वप्नं राजमहोदयः दृष्टवान् । अथतस्य मूर्तस्वरूपं विलोक्य एतस्मात् हिन्दुस्थानस्वतन्त्रतार्थम् अधिकाधिकलाभम् अर्जितुं मानसिकी इच्छा उद्भवति स्म ।

किन्तु रशियादेशस्य स्टालिनसर्वकारः तदर्थं पोतानन्तरणानुमतिं नादात् । टोकियोस्थित-रशियादूतावासोऽपि व्यापकव्यवधानानि उद्भावितवान् । रशियागमनानुमतिः न लब्धा, किन्तु राजवर्यः अन्यकृतविरोधम् अप्रसन्नतां वा सर्वदैव उपेक्षितवान् । सः स्वपद्धत्यनुसारं ध्येयसाधनायां संलग्नः ।

जापानस्थितोऽपि राजमहोदयः हिन्दुस्थानेन सह सम्पर्कं सन्धारयितुं प्रयतते स्म एव । तस्य मित्राणि च तं हिन्दुस्थाने प्रत्यावर्तयितुं निरन्तरं प्रयतन्ते स्म ।

काङ्ग्रेस-नेतृभिः सहापि राजवर्यस्य पत्रव्यवहारः सातत्येन भवति स्म । पत्रव्यवहारे नैकविधविषयाणां चर्चाविचारणाः सम्भवन्ति । १९३९ तमवर्षे सितम्बर-मासे सः काङ्ग्रेस प्रमुखमपि डा. राजेन्द्रप्रसादम् एकं पत्रं लिखितवान् । तत्पत्रस्य उत्तरं ददानः राजेन्द्रप्रसादः प्रत्युत्तीर्णवान् यत्; - "इतः पूर्वं भवता सह कश्चित् परिचयः न स्थापितः, परन्तु सार्वजनिकजीवनसम्बद्धा काचिदपि व्यक्तिः भवत्कार्यविषये अनभिज्ञा स्याद्, इति असम्भवम् । "

१९४१ तम ख्रैस्टाब्दे राजा महेन्द्रप्रतापः अतीव विकटतापूर्णे आर्थिकापत्काले आपतितः सन् एकस्याः वर्ल्ड कम्पेनियन इत्याख्यनूतनपत्रिकायाः प्रकाशनमारब्धवान् । जापानस्थडोवेस्थानके हिन्दुस्थानीयानां सङ्ख्याबाहुल्यात् सः तत्रगतवान् । राजमहोदयस्य

कार्यनिष्ठाप्रभाविता: हिन्दुस्थानीया: तस्य कृते सर्वविधसहायतां प्रकल्पितवन्त: ।

भारतवर्षं प्रवेष्टुं वाईसरोय सकाशात् अनुमति: न लब्धा । अत: स: प्रथमविश्वयुद्धसमादृतप्रयत्नान् सम्पर्कांश्च द्वितीयविश्वयुद्धसमये पुनरारब्धवान् जर्मनी-रशिया-सम्पकार्थं च प्रयतवान् । एतत्सम्पर्ककारणात्न् भारतीय-स्वतन्त्रतान्दोलने अग्रेसर संस्था काङ्ग्रोस अप्रसन्ना स्यात् इति जानन्नपि राजमहोदय: वैश्विकपरिप्रेक्ष्ये वर्तमानस्थित्यनुसारं यथासम्भवम् अधिकाधिकलाभो गृहीतव्य इति मन्यते स्म ।

प्रकृतिस्वाथ्यवैपरीत्येऽपि महेन्द्रप्रताप: कर्मठतपस्वितुल्यं स्वीयं कर्तव्य-यज्ञम् अग्रे सारितवान् ।

•••

प्रकरणम् - १५

राजमहोदयस्य विश्वसङ्घः

प्रथमविश्वयुद्धस्य भीषणपरिणामविषये विचारकरणात् युद्धानन्तरकाले भ्रमणकरणाच्च राजमहोदयस्य मानसफलके विश्वसङ्घस्य कल्पनाबीजम् अङ्कुरितम् । सः अनुभूतवान् यत् विश्वजनीनसमस्याभ्यः मोक्षार्थम् अनन्योऽयम् एकमात्रः उपायः ।

१९१९तमवर्षादेव एतस्यां दिशि राजवर्यः प्रयत्नम् आरब्धवान् । अस्य अभियानस्य प्रकल्परूपेण; जर्मनीनिवासावसरे विश्वसङ्घ इत्याख्यवृत्तपत्रिकामपि आरब्धवान् । एतद्विषये काश्चन पुस्तिकाः अपि प्रकाशितवान् । रिलिजन ओफ लव इत्याख्य पुस्तिकायां सः विश्वसङ्घस्यैव शब्दचित्रं वर्णितवान् । तस्य प्रेरणया तत्समाननाम्नीम् एव संस्थां श्रीमती गिफ्तफाक्मान् महोदया स्थापितवती । श्रीमती गिफ्त लैपूजिन् मुख्यन्यायालय-न्यायाधीशस्य पत्नी आसीत् । राजमहोदयः अद्यावधि कांचित् संस्थां न प्रतिष्ठापितवान् ।

द्वितीय महायुद्धाभ्यन्तरे १९४१ तमवर्षे महेन्द्रप्रतापः विश्वसङ्घसिद्धान्तान् प्रतिपादितवान् । विश्वसङ्घ पत्रिकाङ्के निम्नलिखितोट्टङ्कनानि हेतवः लिखितानि आसन् :-

(१) समग्रविश्वस्य एकां राजधानीं प्रतिष्ठाप्य विश्वसङ्घे स्थापना स्यात् । राजधानीत्वेन सेनलूलू स्याच्चेत् चारुत्तरम् ।

(२) महाद्वीपाः एतस्य सङ्घस्य स्वायत्तशासनप्रान्ताः स्युः ।

(३) महाद्विपप्रान्तेषु त्रीणि चत्वारि पञ्च वा स्वायत्तानि जनपदानि विभक्तानि स्युः ।

एतादृशे अवसरे लब्धे सत्यपि 'अवसरवादीभवनम्'अहम् उचितं न मन्ये । एतादृशेषु अवसरेषु अस्माकं शक्तिविषये प्रतिवादी अवगतस्तु भवेदेव । अधुनाहं मुख्यविषयम् अनुसन्दधामि । अहं तादृशानां मृदुमार्गिणां मनोवृत्ति-विषये अभिज्ञः ये आङ्लसर्वकारसहयोगं कर्तुम् इच्छन्ति । "प्रथमविश्वयुद्धे यथा अमेरिकासहायेन इंग्लेण्ड् विजितवान् तथैव अस्मिन्नपि युद्धे तद् विजेष्यते एव, इति मृदुमार्गीयाः मन्यन्ते । रशियादेशस्य साम्प्रतिकप्रवर्तनया

तेषां विश्वासः अधिकं प्रबलतां प्राप्तोऽस्ति।

वीतयुद्धे आङ्‌ग्लानां सहायकाः पुरस्कारोपाधिभिः सभाजिताः। मृदुमार्गीयाणां लोलुपदृष्टय : तत्र संश्लिष्टाः इव सन्ति। तत्रभवानपि तदानीं सुवर्णपदकेन सभाजितः। भवान् तद् न स्वीकृतवान् "न खलु सर्वे महात्मानः!" स्वार्थः तान् अन्धीभावयति। एतद् ज्ञात्वा अहम् आनन्दितः यद् अस्मिन्नपि युद्धे भवान् कमपि सहयोगं न दास्यति इति। भवान् इंग्लेण्ड्-विरुद्धं युद्धस्य घोषणां न कृतवान्। किन्तु युद्धोद्यमसहायतार्थमपि निषेधं कृतवान्। बाढम्, आङ्ग्लाः भवन्तं निगडितं न कृतवन्तः, तथापि जनमानसे भवतः सत्याग्रहताविषये न कश्चित् सन्देहः। मदीया महेच्छास्ति यद् भवान् साम्प्रतपरिस्थितेः लाभं पूर्णतया उत्थापयतु। इदं सभवं यद् जर्मन्-सैन्यं काकेशस्-अतिक्रम्य समीपतरभाविनि एव आक्रमणं कुर्यात्। जापान् - अपि सार्थवाहान् अवरोद्धुं शक्नोति। ईदृशपरिस्थितौ केवलं भवानेव हिन्दुस्थानं युद्धक्षेत्रभवनाद् अवरोद्धुं शक्तिमात् अस्ति। अहं तत्रभवन्तं पूर्वमपि विज्ञापितवानस्मि अस्मिन् समये कश्चित् अफघानिस्थानात् ईरानाच्च असमपर्यन्तस्य आर्यावर्तस्य नायकत्वेन नियोज्यः तथा च भवता तत्र राष्ट्रप्रधानत्वेन राष्ट्रपालत्वेन (अधिपतित्वेन) वा भवितव्यम्। भवता त्वरितम्; ईरान्, अफ्घानिस्तान-नेपाल-सर्वकारैः सह संपर्कं प्रस्थाप्य तेषां सशस्त्रविशलाः सेनाः हिन्दुस्थानसेनया सह एकीकृत्य एकस्याः विशालतमसेनायाः सङ्घटनं करणीयम्। एतत्समयान्तराले अस्मत्कृते एकः समर्थः प्रामाणिकः सेनाधिनायकः परमावश्यकतमः। यः न तु केवलं सैनिकमात्रम्; अपि तु उच्चविचारवान् सर्वधर्मैकतायश्च विषये विश्वासुः भवेत्। अस्माकं सफलतायाः आधारः केवलम् एकस्मिन् वृत्ते निर्भरः यत्; अस्मदीया सैनिकी सज्जता पूर्णा भवेत् ,तदानीमेव वयं जर्मनी-जापान्-देशाभ्यां सह सम्मानपूर्णं सन्धिं कर्तुम् अर्हाः स्याम। अव्यवस्थानिर्माणेन नास्माकं कश्चिद् लाभः। सुधारणा तु पश्चादपि भवन्ती स्यात्। प्रप्रथमं कार्यम्; अङ्‌ग्ल हस्तात् सत्तायाः अस्माकं हस्ते ग्रहणमेव। युगपद् एव शासकीयपरिरूपस्यापि अस्ततायाः व्यस्ततायाश्च रक्षणम् इत्यस्ति"।

अस्मिन् पत्रे राजमहोदयः कतिविधानां विषयाणां स्पर्शं कृतवान्। यदा जापान्देशः पूर्वीय-एशियायुद्धं घोषितवान्; तस्मादपि त्रिमासात् प्राग् लिखितमिदं पत्रम्। पत्रेण अनेन कानिचित् विगतानि ध्यानाकर्षकाणि; राजवर्यः वर्षेभ्यः हिन्दुस्थानस्य गतिविधिभिः

परिस्थितिभिश्च परिचितः नासीत् । कतिपयवार्ताः लेशमात्रमपि अनुरूपाः न लक्ष्यन्ते । अफधान्- नागरिकत्वात् उदारविचाराधारेण एव सर्वधर्मैकतासमर्थकत्वात् च कारणात् एव राजमहाशयः काँश्चन विषयान् पत्रे लितवान् स्यात् । पत्रद्वारा स्पष्टरूपेण एकः विषयः ध्यानमध्ये आगच्छति यत्; राजा महेन्द्रप्रतापः स्वकीयां मातृभूमिं स्वतन्त्रां सम्पूर्णविश्वमध्ये सुखपूर्णां द्रष्टुं नित्यम् आतुरः आसीत् । एतदर्थं किञ्चित् किमपि कर्तुम् उत्कता तस्य हृदये सदाकालं जीवन्ती भवति स्म ।

●●●

प्रकरणम् - १६

हिन्दुस्थानस्य स्वतन्त्रता एवं विश्वसङ्घः।

राजमहोदयस्य जीवनलक्ष्ये आस्ताम्; विश्वसङ्घः सर्वधर्मैकता च । तत्साधनार्थं हिन्दुस्थानस्य एशियास्थितानाम् अन्यदेशानां च स्वतन्त्रतां सः अनिवार्यां मन्यते स्म । स्वतन्त्रतार्थं च साम्राज्यवादस्य उपनिवेशवादस्य च नाशम् आवश्यकं मन्यते स्म । एकस्मिन् प्रसङ्गे ब्रुवन् राजमहोदयः कथितवान् यत्; इंग्लेण्ड्जनितेन साम्राज्यवादेन फ्रान्स्देशजनितेन उपनिवेशवादेन विश्वम् अतीव दुष्टुतया निगडितम् । अतः देशस्य स्थानिकस्वातन्त्र्यं वैश्विकैकता च स्थापिते स्याताम् इति असम्भवं दुर्वृत्तम् । ताभ्यां खड्गधारेण कूटनीत्या च विश्वोपरि स्वस्य प्रभुत्वं शाश्वतिकं कृतमस्ति; भविष्येऽपि तत् तथैव रक्षितुम् तौ देशौ इच्छां धारयतः । त्रिंशद्वर्षाणि हिन्दुस्थानस्वतंत्रतार्थं बाह्यसहानुभूतिं सहायतां च प्राप्तुं राजमहोदयः विदेशेषु व्यतीतवान् । स : केवलं विदेशीय सहायतया एतादृशं सङ्घर्षं विना बाह्यसहायतां सः निरर्थकां मन्यते स्म । एतादृशं सङ्घर्षं केवलं कोङ्ग्रेस एव उत्थापयितुं शक्ष्यति इति तस्य मतम् आसीत् । राजवर्यः कोङ्ग्रेस्-अन्तर्गतत्वेन आर्यसङ्घं रचयितुम् प्रस्तुतवान् । तस्य उद्देश्यं कोङ्ग्रेस्-पक्षं शक्तिशालिनं कर्तुम् एव आसीत् । श्रीसुभाषबाबूनेतृत्वे सम्भूतायाः 'आझादहिन्दक्रान्त्याः' समर्थने राजमहोदयः कथितवान् यत्; निःसन्देहम्, श्रीसुभाषचन्द्रबोझ-द्वारा सङ्घटित-विद्रोहेण अस्माकम् आन्दोलनं परोक्षसहायतामेव प्राप्स्यति । सर्वप्रकारकप्रवात्या-झञ्झावातेषु आघातान् सोढुं कोङ्ग्रस्-समीपे क्षमता अस्ति । कदाचित् शान्तिपवनम् उत्थापयितुं (उद्भावयितुम्) अपि प्रवात्या-झञ्झानाम् आवश्यकता भवति ।

राजमहोदयः स्वदेशं प्रत्यागन्तुम् आतुरः आसीत्, किन्तु मस्तकं नमयित्वा प्रत्यावर्तनं तस्मै न रोचते स्म । एतां मानसिकतां स्पष्टीकुर्वन् सः एकस्मिन् पत्रे लिखितवान् यत्; "मम मित्राणां सा धारणा पूर्णरूपेण सत्यास्ति यद्, यदि अहं स्वदेशं प्रत्यावर्तिष्ये चेद् अहम् अधिनियमानां मर्यादायां स्थित्वा एव कार्यं करिष्यामि । यदि ते मां बहिः निवासाय विवशं करिष्यन्ति चेदहं ब्रिटिश्-साम्राज्यस्य भित्तिकाः 'भूमित्रीकर्तुम्' अपि युद्धं करिष्यामि तथा अस्माकं जन्मभूमौ ध्वजं लहरीयन् रणशृङ्गं वादयन् प्रवेशं करिष्यामि । वयं सर्वे

जानीमः यत्; युद्धम् इत्येकं महद् द्यूतम् अस्ति। अतः तत्र किमपि सम्भवम् अस्ति; अतः मम मित्राणि इच्छन्ति यद् अहं शान्त्या स्वदेशं प्रतिनिवृत्त्य शान्त्या तत्र कार्यं कुर्याम्"।

द्वितीयविश्वयुद्धे प्रारब्धे हिन्दुस्थानम् अधिकाधिकं लाभम् उत्थापयेत् तदर्थं राजा महेन्द्रप्रतापः अनेकविधान् प्रयत्नान् कुर्वन् स्थितः। एकस्मिन् लेखे सः लिखितवान् यत्; "बुद्धस्य अस्यां भूमौ उपविश्य अहं वर्तमाने महायुद्धे प्रारब्धे एतां स्पष्टघोषणां कर्तुम् इच्छामि यद् अयं सुवर्णः अवसरः अस्ति। स्वतन्त्रतां प्राप्तुम् अस्माकं प्रयत्नानाम् ईदृशः अर्थः नास्ति यत्; प्रत्येकम् आङ्ग्लं-स्त्रीपुरुषाणां हत्या कर्तव्या, इति। एतादृशेन जाङ्गलिकवत् कार्येण सफलता प्राप्तुं न शक्येत। मम कथनस्य तात्पर्यम् इदमेव अस्ति यद्; विद्रोहस्य मुक्तः प्रचारः भवितव्यः एव। यदि सः (विद्रोहः) शासनद्वारा दम्यते चेत् तस्य दमनस्य सामूहिकविरोधः भवितव्यः। अनेन प्रकारेण जनितां सामूहिकीं व्यापिकां च जागृतिं प्रति आङ्ग्लाः मस्तकं नामयिष्यन्ति।

यदि स्वाधीनताप्राप्तौ विलम्बः भवेत् तथा युद्धं लम्बायमानं स्यात् चेद् भारते आंग्लशासनं नाशयितुं बहिष्ठप्रयत्नाः कर्तव्याः भविष्यन्ति।"

अनेन राजमहोदयः स्वदेशस्वातन्त्र्यार्थं कियान् चिन्तनशीलः (चिन्तातुरः) आसीत्; इति ध्यानाकर्षकम् अस्ति। विदेशेषु तादृशाः अनेके जनाः विभिन्नदेशेभ्यः विदेशीयसहायतां प्राप्तुं सक्रियाः जाताः आसन्। १९४०तमवर्षे अमेरिकास्थ-गद्दरपक्षाध्यक्षः राजमहोदयम् उद्दिश्य पत्रे लिखितवान्; "अस्माकं सर्वेषां लक्ष्यम् एकमेव; तर्हि एकीभूय एव तत्कथं न प्राप्तव्यम्! चतुर्दिग्भ्यः एतदर्थं प्रत्नाः भावयितव्याः। अस्मदीयजनाः सर्वस्थानेषु कर्माणि लग्नाः एव सन्ति। यदि भवान् कथमपि भारतं प्राप्नुयात् चेत् अस्मदीयजनाः भवते पूर्णतया सहकारं दास्यन्ति" इति।

विदेशेषु स्वतन्त्रतार्थं कार्यं कुर्वतां सर्वेषां मानसे राजमहोदयविषये विशेषः आदरभावः आसीत्। एवञ्च ते सर्वे एवं मन्यन्ते स्म यत्; तस्य (राजवर्यस्य) नेतृत्वे इदं ध्येयं पूर्णं कर्तुं शक्यं स्यात्।

जर्मनी इटाली ईरान् अफघानीस्तान देशान् गत्वा तेषां सहायेन एकं दमनं (प्रभावम्) उद्भावयितुं प्रयासं राजमहोदयः आरब्धवान्, परन्तु सः तत्र गन्तुं सफलतां न

प्राप्तवान् । निराशः भवितुम् अशिक्षितः राजमहोदयः अन्यान्यप्रयत्नान् चलतः एव रक्षितवान् ।

१९४१तमवर्षान्ते राजवर्यः विगतं प्राप्तवान् यत्; आंग्लाः ईरानम् अफघानीस्तानं च स्वपक्षीये कृतवन्तः सन्ति । एतद् ज्ञात्वा राजवर्यः अतीव व्यथितः जातः । एतां वेदनां प्रकटयन् सः लिखितवान् यत्; "हिन्दुस्थाने स्वल्पापि चेतना जागृतिः क्रान्तिः वा न उत्पन्ना । उत्पन्ना भवितुमपि नहि शक्येत । हिन्दवः; मुस्लीमेषु स्थितायाः देशभक्तेः ऊनतायाः टीकाकरणे एव व्यस्ताः । कतिपयहिन्दवः सर्वसमक्षं विदेशीयसत्तायाः सहायतां समर्थनं च कुर्वन्तः सन्ति । 'मुस्लीमसङ्घ(लीग्)' बाढम्, शब्दे नहि, परन्तु आचरणद्वारा राजसहायतां करोति ।"

"एतं सुवर्णावसरं न लोपयिष्यामि" इति भावेन सह राजमहोदयः विदेशवास्तव्यानाम् अपि (मूलतः) हिन्दुस्थानीयानां कृते एकम् अनुरोधं प्रकाशितवान् । तत्र सः निवेदितवान् यत्; "विदेशीयसत्तायाः कठोरपराधीनतायां यत् किमपि वयं कर्तुं शक्ताः आस्म तत् कॉङ्ग्रेस्-रूपेण कृतवन्तः । यदि समग्राः देशवासिनः कॉङ्ग्रेस्-सहकारम् अकरिष्यन् चेत् निश्चयेन अद्यावधि स्वतन्त्रतां प्राप्ताम् अकरिष्याम । अस्मदीय-देशवासिनां कृते अहं केवलम् एकं निवेदनं कर्तुम् इच्छामि यत्; 'कॉङ्ग्रेस्-सहायतां कुर्वन्तु' इति । देशाद् बहिः निवसतः अनुरुन्धे यत्; यस्मिन् देशे भवन्तः निवसन्ति तत्र हिन्दुस्थानस्य (सेनायाः) आर्यसेनायाः वा सङ्घटनं कृत्वा नवभारतवर्षस्य जननं कारयितुं नूतनाभिः आशाभिः दृढविश्वासेन च हिन्दुस्थानप्रवेशविषये प्रबलतां दधतु" ।

राजमहोदयस्य स्वप्नाः पूर्णाः नैव संवृत्ताः । सः योजनानां मूर्तं स्वरूपं प्रकटयितुं समर्थो न जातः । देशस्य स्वतन्त्रतार्थं सः सेनाम् उत्थापयितुं न शक्तवान्; किन्तु तस्य भावनाः कल्पनाः योजनाः च नेताजी सुभाषचन्द्रः कार्यरूपेण परिणमितवान् ।

स्वदेशस्वतन्त्रतायै राजमहोदयस्य उत्कता तथा तदर्थं किञ्चित् कर्तुं कर्मठता सन्देहेन विवादेन च सम्पूर्णतया रहिते स्तः । तस्य देशप्रेमा स्फटिकमणिसमानः निर्मलः आसीत् तथा देशभक्तिः गङ्गाधारासदृशी अत्यन्तं पवित्रा आसीत् ।

●●●

प्रकरणम् - १७

स्वदेशागमनम्

'एस्. एस्. सिटी'नामकः महापोतः १९४६तमवर्षे टोकियोतः हिन्दुस्थानं प्रति प्रस्थितः । १९४२तमवर्षस्य ८ अगस्त-दिनाङ्कः; इयं तिथिः भारतस्वातन्त्र्यार्थं महत्त्वपूर्णत्वेन गणिता भवति । अस्मिन् १९४६तमवर्षस्य ऐतिहासिकदिवसे तिसृभ्यः दशाब्दीभ्यः पश्चात् एकस्य महापुरुषस्य आगमनं जातम् ।

चेन्नाईमहानगरे अगस्तक्रान्तेः स्मृत्यर्थं समारोहः आयोजितः; तत्र राजमहोदयः प्राप्तवान् । ततः अनुपदमेव वर्धां गत्वा तत्र कॉङ्ग्रेस्-कार्यसमितिनिमित्तं समवेतान् नेतॄन् महात्मगान्धिं च मिलितवान् । वर्धातः सिद्धः स्वजन्मस्थानं मथुरां प्राप्तः । मथुरायां कतिपयदिवसान् व्यतीत्य मोहमयीं गतवान् । ततः अकोला, नागपुरादिस्थानेषु लघुनिवासानन्तरम् अलीगढं प्राप्तवान् । अलीगढतः देहली-मेरठ-मुझफ्फरनगर-सदृशानाम् अनेकेषां स्थानानां प्रवासः कृतः ।

यत्र यत्र राजा महेन्द्रप्रतापः गतः तत्र तत्र तस्य भव्यं राजकीयस्वागतं क्रियमाणम् आसीत् । स्वकीय-भाविकार्यक्रमसम्बन्धे राजमहोदयः स्वभाषणेषु मुख्यत्वेन चतुर्धा विषयान् वर्गीकृतवान् :-

(१) सर्वेषां नेतॄणां सम्पर्कपूर्वकं विचारविनिमयः करणीयः ।

(२) देशाटनपूर्वकं परिस्थितेः अध्ययनं करणीयम् ।

(३) प्रेममहाविद्यालयस्य पुनरुज्जीवनपूर्वकं निश्चितादर्शानुसारं ग्रामीणक्षेत्रेषु प्रेममहाविद्यालयस्य स्थापना करणीया ।

(४) हिन्दु-मुस्लीमैकतार्थं सत्त्वमयं कार्यं करणीयम् ।

समयस्य चक्रं कियता वेगेन घूर्णितम् ?

एकः राजकीयः, लेखकः, चिन्तकः, क्रान्तिकारी, प्रशिक्षणकारः, कूटनीतेः कर्णधारः, विश्वशान्तेः प्रहरी; इतीदृशानि कियन्ति विशेषणानि राजमहोदयस्य महेन्द्रप्रतापस्य नाम्नः पुरतः लेखितुं शक्यानि ।

शपथ लेकर पूर्वजों की, आस हम पूरी करें
मस्त होकर कार्यरत हों, ध्येयमय जीवन धरें
दे रहे युग को चुनौती, आज हम ललकार कर...
(शपथपूर्वं पूर्वजानाम्, सदाशां सम्पूरयेम,
मस्ततायुतकार्यनिरताः, ध्येयमय जैवं धरेम,
युगाह्वानं सन्ददानाः, घोषयेम च घोषणाम्....)

एतां काव्यपङ्क्तिं चरितार्थां कुर्वाणः महामनीषी राजमहोदयः स्वयम् आरब्धस्य विश्वसङ्घकेन्द्रस्य कृते आश्रमस्य कृते च प्रन्यासिवर्गं (विश्वस्तवर्गं) विरचय्य भारतं समागतः ।

राजमहोदयः 'स्वप्नद्रष्टा' आसीत् । भविष्यस्य निरूपणकर्तारः एतादृशमानुषाः वर्तमानाद् एतावद् अग्रे वर्धिताः भवन्ति यत् केवलं वर्तमानं प्रति एव दृष्टिं रक्षन्तः लौकिकाः तान् संज्ञातुं न शक्नुवन्ति ।

एकस्य पथिप्रदर्शकस्य जीवनकार्यस्य सौरभं वयं प्राप्तवन्तः । "देशः अस्मभ्यं यत्किञ्चित् सर्वं प्रयच्छति, वयमपि किञ्चित् दातुं शिक्षेमहि" इत्यस्य (अस्मज्जीवने) सङ्कल्पः; स एव राजमहोदयाय आदराञ्जलित्वेन गणयिष्यते ॥

oooooooooooooooo

ISBN - 13 - 078-81-925721-6-1

Shree Somnath Sanskrit University - Veraval.
Veraval- 362 266, Dist : Junagadh (Guj.) India
Phone : 02876 - 244528, 29, 32 Fax : 244417
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info